Shri Raghunath Temple MSS. Library,
JAMMU

No. १२६०

Title अनुमिति विचारः

Author हरिराम तर्कवागीश भट्टाचार्यः

Extent ४५ Age

Subject न्यायशास्त्रम्

चतुस्त्रिंशति पदान्पर्णी विचारः

१२७०

ग्रहमैत्रीविचार

१...

श्रीगणेशाय नमः॥ अनुमितिपरामर्शयोः सामान्यतोऽनुमितित्वपरामर्शत्वाभ्यां कार्यकारणभावः॥ परामर्शत्वं च ज्ञा
प्ति विशेषः॥ ननु व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं व्यापकत्वं ततो व्याप्त्यादेः साध्यादिभेदेनाननुगमेपि न क्षतिः॥ न च तादृश
ज्ञानत्वेमानाभावः॥ अनुमितित्वं पानुगतकार्यजनकतावच्छेदकत्वेयेव तत्सिद्धेः॥ न च तादृशज्ञानत्वेस्याक्षुषत्वादिना संक
रइतिवाच्यं॥ मानसपरामर्शएव तादृशजातिस्वीकारेण चाक्षुषत्वादिनासामानाधिकरण्यविरहात्॥ एवं सति चाक्षु
ष[redacted]दिव्याप्यवत्ताज्ञानिश्चयदशायां फलायपलायद्गतिनुनाशंकनीयं॥ तादृशव्याप्यवत्ताज्ञानानंतरं तन्मूलकोपनीतभा
नात्मकमानसपरामर्शोत्पत्त्यैवानुमितिसंभवात्॥ न च पक्षादिचक्षुःसंनिकर्षसत्त्वे चाक्षुषपरामर्शानंतरं चाक्षुष
परामर्शस्यैवोत्पादात्मानसपरामर्शासंभवः॥ मानसादिसामग्र्याश्चाक्षुषादिसामग्र्यपेक्षया दुर्बलत्वादिति वा
च्यं॥ चक्षुःसंयोगादिसत्त्वेपि चक्षुर्मनोयोगादिविगमेन चाक्षुषासंभवेन मानससंभवात्॥ फलानुरोधेन तथैव क
ल्पनात्॥ चाक्षुषा[redacted]घतुत्पादस्यतत्त्वोभयवादिसिद्धतया चक्षुर्मनोयोगादिविगमकल्पनेवाधकाभावात्॥ नवी

वमपि क्षरौकर्ष्यलापः अनन्यगत्यातिव्याप्त्यस्वीकारात् । अयं परामर्शत्वजातिर्मानसत्वव्याप्या स्मृतित्वव्याप्या वेति विनिगमना
विरहः । स्मृतित्वव्याप्यत्वेपि चाक्षुषपरामर्शोत्तरं स्मरणात्मकपरामर्शकल्पनया क्षणविलंबेनानुमितिस्स्यादनसंभवा
त् । नच स्मरणकल्पने उद्बोधक[redacted]कल्पनाधिक्यमिति वाच्यं । तत्र व्यवहितसर्वपूर्ववर्तिव्याप्यमनोयोगादेरेवोद्बोधकत्वस्वी
कारेति रिक्तकल्पनानवकाशात् । नच धर्मिज्ञानाभयवादिसिद्धत्वेपि उद्बोधकविधया तस्य हेतुत्वकल्पनाधिक्यं दुष्प
रिहरमेवेति वाच्यं । तदानीं मानसकल्पनेपि तादृशव्यक्तीनां समयांतरे सामान्यसामग्रीबलादुत्पादवारणाय तद्व्य
वहितपूर्ववर्तिव्याप्यमनोयोगव्यक्तीनां विशिष्य हेतुताकल्पनस्यैवावश्यकतया साम्यादिति चेन्न । स्मृतित्वव्याप्य
त्वे चाक्षुषादिपरामर्शस्य ले द्वितीयक्षणे तत्र संस्कारात्तृतीयक्षण एव स्मरणात्मकपरामर्शसंभवात्तच्चतुर्थक्ष
णेनुमितिर्भविष्यति । मानसत्वव्याप्यत्वे च तृतीयक्षण एवानुमितिर्भविष्यतीति क्षणविलंबाधिक्यस्यैवाविनिग
मकत्वात् । वस्तुतस्तु स्मृतित्वव्याप्यत्वमते स्मरणात्मकपरामर्शकल्पनाक्षणे मानसस्योत्पत्तौ बाधकाभावः । उपना

या

अनु· २ पकज्ञानव्यदितास्तन्नसामग्र्याश्रपितत्रसत्वात् अतोमानसे प्रतितत्र स्मरणसामग्र्याः प्रतिबंधकत्वात्वयावाच्या इत्यनंतप्र

तिबंधप्रतिबंधकभावकल्पने गौरवमेव विनिगमकं स्मृतिसामग्र्या अनुगत प्रतिबंधकज्ञानसंभवति। न हृटका

म्नतो द्वाधकानामननुगमात् एतेन स्मृतित्वव्याप्यत्वमते विशेषकारणतायां निश्चयत्वानिवेशे लाघवमिति संशया

त्मकस्मरणप्रसिद्धा निश्चयत्वप्रवेशव्यावर्त्याभावात् न च मानसत्वव्याप्यत्वमतेपि परामर्शत्वजातेः संशयात्मक

मानसानंतरं व्यदनुमितिर्न स्यात् अतः संशयात्मकपरामर्शेपि परामर्शत्वजातेः स्वीकार आवश्यकः। अत एव तदुत्त

× व्याप्यवत्तामानसेन भुपगमात् निश्चयत्वनिवेशो नास्तीति वाच्यं॥ वह्निव्याप्यवत्त्रांशे संशयात्मकव्हटव्याप्यवत्तांशेनिश्च

यात्मकसमूहालंवनात्मक×रं वह्न्यनुमितिवारणाय तन्मते निश्चयत्वनिवेशस्यावश्यकत्वात् इतः स्मृतित्वव्याप्यमे

व परामर्शत्वमितिपरास्तं॥ निश्चयत्वनिवेशापेक्षया सामग्रीप्रतिबंधकत्वकल्पनाधिकगौरवादिति। ।वस्तुतो

निश्चयत्व मानसत्वव्याप्यत्वमतेपि निवेशो नास्ति उक्तसमूहालंवनानंतरं स्मृतित्वव्याप्यत्ववादिन उपवएतन्मतेपिघटानुमितिप्र राम· २

नभ्युपगमेन तत्त्वपरामर्शत्वजातेरनभ्युपगमात् तन्निश्चयत्वानिवेशेऽपि व्याप्यस्याभावात् तत्पदविवक्षितत्वव्याप्यत्वम
तेनादृशसमूहालंबनात्मकमानसानंतरं स्मरणात्मकह्रदादिव्याप्यवत्ताज्ञानं कल्पयित्वा ह्रदानुमितिरुपपाद
यितुं शक्यते। तेषामापादितद्वयं वह्निव्याप्यवत्ताद्यविषयकह्रदादिव्याप्यवत्तावगाहिमानसं कल्पयित्वानुमिति
सामग्री
रुपपादनीया। उपनायकज्ञानसत्त्वात् तत्र वह्निव्याप्यत्वस्य भाने बाधकाभावादिति चेत् एवमनुमितेऽपि तद्दशायां वह्निव्याप्यत्व
विषयकमानसोत्पत्तौ तत्र बाधकाभावः। ह्रूतप्रतिबंधकताकल्पनसामग्र्यास्तत्राभावात्। व्यतिरिक्तप्रति
बध्यप्रतिबंधकभावकल्पनयोपपत्तिश्चोभयमतेतुल्या इति। तस्मात् तात्पक्षसत्त्वव्याप्यमेव परामर्शत्वमिति केचि
त्तदेवेदं चिंतनीयं॥ ह्रदादिव्याप्यवत्ताप्रामर्शाद्धूमाद्यनुमित्यापत्तिवारणाय वह्न्याद्यनुमितौ वह्न्यादिव्या
प्यवत्ताज्ञानस्य हेतुतापादिविशिष्य [illegible]वच्छेदकत्वादेतादृशकार्यकारणभावे मानाभावः॥ नच कारणतासत्वे
कार्यतावच्छेदकावच्छिन्नोत्पत्तिरिति नियमः तथा चानुमितित्वावच्छिन्नापादने ह्रदापत्तिः वह्न्यनुमितित्वावच्छि

अनु. २ 3

त्वापादनेव्यापकाभावइतिवाच्यं॥तथापिह्रदबाधकालेऽनुमितित्वावच्छिन्नव्यापत्तेः वह्न्यनुमितित्वावच्छिन्नव्यापकस

सिद्ध्यभावस्यसत्वाद्धेतिबोध्यं॥नचविशेषकारणतायाआवश्यकत्वेपियद्विशेषयोःकार्यकारणभावो[illegible]बाध

कंविनातत्सामान्ययोरितिनियमानुरोधेनसामान्यकारणतायाआवश्यकत्वमितिवाच्यं॥तादृशनियमेमाना

भावात्तद्भावेवाज्ञानत्वेनानुमितित्वेनकार्यकारणभावोस्तुकिंपरामर्शत्वजातिकल्पनया।एतेनविशेषकार्यका

रणभावेवस्तुसमाणमुक्ताकारणवैशिष्ट्यनिवेशस्यावश्यकत्वेनचानुमितित्वनिवेशोनास्तितद्दनिवेशोप्यभिमा

राभावात्।एवंचकार्यमात्रवृत्तिधर्मेस्यकस्यचित्कार्यतावच्छेदकत्वनियमानुरोधादनुमितित्वावच्छिन्नंप्रतिपरामर्शत्वे

नसामान्यहेतुत्वकल्पनमावश्यकं॥नचैतादृशनियमानुरोधेनक्लृप्तविशेषकार्यतायामेवानुमितित्वस्यावच्छेद

कत्वमस्तुकिमतिरिक्तकार्यकारणभावेनेतिवाच्यं॥विशेषकार्यतायामनुमितित्वस्यावच्छेदकत्वोपगमेऽनंत

स्थलेऽवच्छेदकगौरवापातात।तदपेक्षयाऽतिरिक्तकार्यकारणभावस्यौचित्यात्इत्यभिप्रिनिरस्तं॥तात्रत्वेनहेतुत्वे राम. २

पविशेषसामग्रीविरहादेवापत्यभावात्। परामर्शत्वजात्यपेक्षयाज्ञानत्वस्यव्यापकधर्मत्वाद्‌न्यथासिद्धिनिरूपकत्वेनकपंनेनरू२

पगमेतादृशनियमोपपत्तेः परामर्शत्वजातेस्तयाप्यसिद्धेः॥ नवज्ञानत्वेनहेतुत्वकल्पनेप्रत्यक्षज्ञानादनुमित्यापत्तिः॥ विशेषसाम

ग्रीसहितायाएवसामान्यसामग्र्याःफलोपधायकत्वात्॥ वह्निव्याप्यवज्ज्ञानाज्ञानादित्वेपराहेतुतेतिनाशंकनीयं॥ स्वसामा

नव्याप्यधर्मसंभवएवव्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वात्। परामर्शत्वस्याखंडत्वात्॥ नवज्ञानत्वेनहेतुत्वेसंयोगत्वा

दिनाहेतुत्वमादायविनिगमनाविरहः॥ परामर्श[redacted]परामर्शत्वस्यकारणतावच्छेदकतयेवप्रसि

द्धेःनत्ववच्छेदकतयाधर्मियाहकप्रमाणसिद्धत्वात्तविनिगमनानवकाशइतिवाच्यं॥ एवमपिअनुमितित्वावच्छिन्नज

नकतावच्छेदकतयेवपरामर्शत्वजातिसिद्धिस्त्स्यास्तथात्वेप्युक्तयुक्त्यानिरूपतानिवेशेनलाघवात् एवंचसिद्धायामे

तादृशजातौतयेवसामान्यतयाजातिविशेषःपरामर्शसंयोगादौवाकल्प्यतेइत्यत्रविनिगमनाविरहस्यदुर्वारत्वात्॥ अ

थविशेषकारणतावच्छेदकत्वेहेतुतापिदानींज्ञानत्वस्याव्याप्यस्यान्यथासिद्धिनिरूपकत्वारेइतिचेत्रएवंसतिशाब्दबोधादि

जनकतावच्छेदकतयाआकांक्षाज्ञानादिनिष्ठजातिविशेषासिद्धेःतदेवंचैतेःसमंआकांक्षादिविषयकसमूहालंबनेन

१तात्पर्यनिर्णया१ ४त्वेनतद्धेतुत्वेतुद्द

ज्ञ

अ॰ वा॰ रामर्शत्वस्य संकरप्रसंगः॥ न च यदि तादृशसमूहालंबनेनान्तरमनुमितिरस्तु इत्यत्रेनैतच्छाब्दबोधानुत्पादात्तादृशशाब्द
४ जनकतावच्छेदकजातिर्न स्वीक्रियते परं च शाब्दबोध उत्पद्यते न त्वनुमितेरनुत्पादात्तत्परामर्शत्वेन स्वीक्रियते इति न सं
५ करइति वाच्यं॥ यत्र तादृशसमूहालंबनेनानुमितिशाब्दबोधौ क्रमेणोत्पादितौ न तत्रैवोभयजातिसमावेशेन संकरप्रसंगात्।
अथ यादृशसमूहालंबनेन प्रथमं यादृशज्ञानं जन्यते तत्र तादृशज्ञानजनकतावच्छेदकजातिरेवोपेयते। न तु तदुत्तरं ता
दृशज्ञानेन द्वितीयं तद्विजातीयज्ञानं तेन जन्यते अपि तदुत्तरोत्पन्नाविज्ञानान्तरेणोभयजात्योः समावेश इति चे
त्॥ मास्तु संकरप्रसंगस्तथापि तादृशजातिः परामर्शत्वेनैव परामर्शहेतुतायां निरूपितत्वनिवेशस्यावश्यापनीयत्वेन फला
द्वव्यानवकाशात्॥ तथाहि वह्निव्याप्यवान् पर्वतो धूमव्याप्यवानिति तादृशसंशयानन्तरं वृष्टानुमितिनिर्वाहाय तत्र प
रामर्शत्वजातिस्वीकार आवश्यकः॥ न च तादृशज्ञाना वृष्ट्यनुमितिर्न जायते एव परं तु तदुत्तरभाविनो ज्ञानादित्युक्तमेवइ राम॰
ति वाच्यं। तादृशज्ञानेऽपि वह्निव्याप्यत्वद्भावयोर्भानसंभवेन तत्र परामर्शत्वस्वीकारेण तदुत्तरं वह्न्यनुमित्यापत्तेः॥ अतिरिक्त ४

प्रतिबध्यप्रतिबंधकभावं कल्पयित्वा तादृशज्ञानस्य वह्निव्याप्यवत्ताविषयकत्वोपपादने गौरवात् तत्तद्रूपेणानिश्चयत्वेन हेतु
तायाः कल्पनसौचित्यात्। अत्रेदं वदंति॥ अनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन सामान्यतो हेतुतानभ्युपगमे परामर्शसामान्य
शून्यकालीनानुमितित्वावच्छिन्नाभावे ऽनंतविशेषसामग्रीविरहकूटस्य प्रयोजकत्वाभ्युपगमे गौरवं। अस्माकं तु तत्र एकस्य प
रामर्शत्वावच्छिन्नाभावस्य प्रयोजकतयैवोपपत्तेः॥ तादृशलाघवस्य कारणतायामनुपष्टंभकत्वे तु तत्तद्व्यक्तिस्थलीयवि
शेषसामग्रीत एवोपपत्तौ सर्वत्र सामान्यधर्मावच्छिन्नकारणताया विलयप्रसंगात्। न च परामर्शसामान्यशून्यकाली
नानुमित्यभावः सिद्धिविशेषसमवहितपरामर्शकालीनानुमितिसामान्याभावाद्व्यतिरिक्त एव तत्र च तत्तद्विषयकानु
मितिविशेषसामग्रीविरहाणां प्रयोजकत्वमावश्यकमेव तत्र परामर्शत्वावच्छिन्नाभावासत्वात्। न हि सिद्धिकालीनपरा
मर्शेऽनुमितिसामान्यजनकतावच्छेदकजातिरेव न स्वीक्रियत इति संभवति॥ स्वजन्यानुमित्यात्मकफलसिद्धिसमवहितपराम
र्शेतरत्वानुपगमे ग्राह्यमिकं नुमितेरेवानुपपत्तेरिति वाच्यं॥ उक्तस्थलानुरोधेन सिद्ध्यभावादिरूपविशेषकारणाभावादि

अ॰दी॰ ५ नां प्रयोजकतया उभयवादिसिद्धत्वेपि परामर्शविशेषाभावानां अनुमितिसामान्याभावप्रयोजकत्वाकल्पनेन लाघवसंभवात्।
५ वस्तुतस्तु अनुमित्यादिरूपसामान्यकार्याभावस्य किंचित्कालावच्छेदेन सर्वैर्वैव सत्त्वात् तत्सामान्याभावनियम्यः किंतु तत्त-
5 त्कालावच्छिन्नतत्तदधिकरणत्वमेव तदव्यवहितप्राक्कालावच्छिन्नसामग्रीविरहव्याप्यं नियम्यं तेन्नेपसामग्र्यभाववत्त्वापाः
प्रयोजकत्वात् तत्त्वावच्छेदकमेव हि तत्त्वमेवेति परामर्शसामान्यविरहाणां तत्तत्क्षणावच्छिन्नानुमितिमद्भावाधिकरणत्वे विशे-
षसामग्रीविरहकूटस्य प्रयोजकत्वेनोभयसिद्धमिति परामर्शसामान्याभावस्य प्रयोजकत्वे लाघवमस्माकमेवेति दिक्
॥ पर्वततावच्छिन्नोद्देश्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नविधेयताकानुमितौ पर्वतत्वावच्छिन्नविशेष्य-
तानिरूपितसंयोगसंबंधघटितवह्नित्वावच्छिन्ननिरूपितव्याप्तिविशिष्टधूमत्वावच्छिन्नप्रकारताशालिनिश्चयत्वे-
न विशिष्य हेतुता वाच्या॥ इत्थं वह्निव्याप्यधूमवदित्याकारकपरामर्शात् पर्वतो वह्निमानित्येतादृशानुमितेरुत्पत्त्या
तपर्वतत्वावच्छिन्नविशेष्यतानिवेशः॥ जातित्वादिना पर्वतत्वादि [redacted] धर्मितावच्छेदककपरामर्शात् तद्रूपतः पर्वतता- ए॰ ५

दिधर्म्मितावच्छेदककानुमित्यनुदयापत्तेः तादृशानुमितिजनकतायांपर्वतत्वादिनिष्ठनिरवच्छिन्नावच्छेदकताकत्वरूपपर्वतत्वा
द्यवच्छिन्नत्वंनिवेश्यं॥जातिमान्वह्निमानित्याकारकजातित्वाद्यवच्छिन्नविशेष्यतावच्छेदकताकानुमितौतादृशपरामर्शस्य
कारणत्वात्तदंवारणंच॥एवंतत्रत्यपर्वतधर्म्मिकानुमितिजनकतावच्छेदकीभूतविशेष्यतायांतत्रत्यपर्वतवृत्तित्वंनिवेश्यम्एकध
र्म्मिकपरामर्शादन्यधर्म्मिकानुमित्यनुदयापत्तेः।इत्थंचपर्वतत्वादिरूपविशेष्यता[redacted]वच्छेदकभेदेनविशेष्यभेदेनका
कारणाभावभेदोऽनुपगंतव्यः॥अत्रमीमांसकानुयायिनः॥समानविशेष्यकंनतंत्रं॥किंतुसमानप्रकारकत्वेनेवकार्य
कारणभावः।पर्वतत्वादिरूपेणैकपर्वतविशेष्यकपरामर्शात्तेनरूपे[redacted]राधर्म्मि
यदि तरविशेष्यकानुमित्युपगमेक्षतिविरहात्।यदिवैधर्म्मिणोनिवेश्यपर्वतत्वादिकंनिवेश्यकार्यकारणभावःस्वीक्रियतेत
दापर्वतत्वादिनापर्वत मात्रविषयकपरामर्शजन्यानुमितौजगतएवभानापत्तेः।तथात्वंतत्तद्विशुद्धमितिमन्यतेत
पर्वतत्वावच्छिन्नविशेष्यतायांसामान्यतएवपर्वतादिवृत्तित्वंनिवेश्यं॥नतुतत्तत्पर्वतादिवृत्तित्वं।पर्वतत्वादिनाहृदस्य

श्रु·वा· ६ 6 वगाह्यनुमितौ च तादृशपरामर्शस्य कारणतावच्छेदकत्वं नायाभवतोऽप्येवं स्वपकत्वादिति वदंति॥ वह्निव्याप्यधूमवत्पर्वतवानयं देश
इति ज्ञानादनुमितस्तु तद्रूपाता॥ मुख्यविशेष्यत्वमपि निवेश्यं तच्च प्रकारतान्वितं॥ उपदर्शितस्थले वह्निव्याप्यधूमप्रकारतानि
रूपितविशेष्यतापादेशनिष्ठविशेष्यतानिरूपितप्रकारतात्मकतया न तादृशज्ञानादनुमित्यापत्तिः॥ व्याप्तिविषयकपरा
मर्शादनुमित्यापत्तिवारणाय व्याप्तिविशिष्टधूमत्वाद्यवच्छिन्नत्वस्य प्रकारतायां निवेशः॥ तदर्थश्च व्याप्यत्वावच्छिन्नत्वे सति
धूमत्वाद्यवच्छिन्नत्वं॥ धूमत्वादिनिवेशप्रयोजनं तु स्फुटीभविष्यत्यग्रे पञ्चमव्याप्तिशरीरे साध्यस्य एकः संबंधप्रविष्टस्तत्राप त्य५
रसंबंधेन साध्यानुमितिवारणाय तत्संसर्गस्यानुमितिजनकतावच्छेदककोटौ निवेशः॥ तत्र व्यापकसामाना
धिकरण्यपञ्चव्याप्तौ साध्यतावच्छेदकसंबंधस्य घटकतोभयथा साध्यतावच्छेदकसंबंधेन साध्याधिकरणो हेतुतावच्छे
दकसंबंधेन वृत्तित्वरूपस्य साध्यसामानाधिकरण्यस्य साध्यतावच्छेदकसंबंधावच्छि[redacted] तन्· ६
भाववद्वृत्तित्वरूपव्याप्तौ साध्याभाववपदस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववपरतयास्तु
ज्ञाभावप्रतियोगितावच्छेदकत्वरूपव्यापकत्वसाध्यांशे निवेशात्॥ साध्या

7

वेशं इति शेषः ॥ द्रव्यत्वावच्छिन्ननिरूपितव्याप्तिज्ञानाद्वह्नित्वावच्छिन्नविधेयकानुमितिवारणाय तज्जनकतायां वह्नित्वा-
वच्छिन्ननिरूपितव्याप्तिनिवेशः ॥ वह्नित्वाद्यवच्छिन्ननिरूपिता व्याप्तिर्द्विविधा ॥ हेतुसमानाधिकरणाभावप्रतियोगिता-
नवच्छेदकवह्नित्वावच्छिन्नसामानाधिकरण्यरूपा वह्नित्वावच्छिन्नाभाववद्वृत्तित्वरूपा च । स्वव्यापकसामानाधिक-
रण्यत्वादिना वस्त्वन्तरमवगाहमानाद्धूमव्यापकवह्निसमानाधिकरणो धूमवान्पर्वत इत्यादिपरामर्शो [illegible] वह्न्यभाववद्वृत्ति-
त्वाभावत्वादिना घटाभावादिकमवगाहमानात्तु वह्न्यभाववद्वृत्तिधूमवान्पर्वत इत्यादिपरामर्शाद्वानुमितेरनुत्प-
प्रसंगः तादृशाभ्रमात्मकपरामर्शे स्ववास्तवव्याप्यत्वं न गाहितया कारणतावच्छेदकानाक्रान्तत्वात् एवं च व्यापक-
सामानाधिकरण्यरूपाया व्याप्तेः केवलसामानाधिकरण्यत्वादिना वह्न्यभाववद्वृत्तित्वरूपाया व्याप्तेः केवलाभावत्वा-
दिनाभाने तत्राप्यनुमित्यापत्तिः ॥ तादृशज्ञानस्यापि वास्तववह्निव्याप्यत्वावच्छिन्नधूमादिप्रकारताशालित्वादिति
चेन्न ॥ तादृशवास्तवव्याप्यत्वावच्छिन्नत्वं धूमादिप्रकारतायां निविष्टं ॥ येनोक्तदोषः स्यात् ॥ किंतु व्यापकसामानाधि-

×याअधिकरणता(ता)त्वावच्छिन्नावच्छेदकतातन्निरूपकीभूतायाआधेयता(ता)त्वावच्छिन्नावच्छेदकतातन्निरूपकीभूतायाअभावत्वावच्छिन्नावच्छेदकतेनिरूपकता ४१

अनुमि· करणपावगाहिपरामर्शहेतुतायांहेतुतावच्छेदकावच्छिन्नायांहेतुनिष्ठावच्छेदकतातन्निरूपकीभूतायांतन्निरूपिता(या)प्रतियोगि
७ त्वनिष्ठावच्छेदकतातन्निरूपितावच्छेदकत्वनिष्ठावच्छेदकतातन्निरूपिताभावत्वावच्छिन्नावच्छेदकतातन्निरूपिकंवह्नित
त्वावच्छिन्नावच्छेदकतातन्निरूपितसाध्यनिष्ठावच्छेदकतातन्निरूपिकाधिकरणनिष्ठावच्छेदकतातन्निरूपिकाधेय
तत्वावच्छिन्नावच्छेदकताकत्वमेवहेतुतावच्छेदकावच्छिन्न[redacted]प्रकारतायांनिवेशनीयं॥हेतुनिष्ठत्वसाध्यनिरूप
संबंधावच्छिन्नत्व णोहेतुतावच्छेदकसाध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यचतादृशावच्छेदकतायांलाभायनिवेशः॥तेननधूमत्ववह्नि
त्वादिनाघटादिविषयकज्ञानादनुमित्यनुपपत्तिः॥प्रयोजनाभावाद्धूमविषयतानिवेश्यते नील धूमव्यापकव
ह्निसमानाधिकरणधूमवानित्यादिज्ञानवारणायधूमादिनिष्ठावच्छेदकताधूमत्वान्यधर्मानवच्छिन्नत्वेनविशेषणी
या॥एतेनेंधनव्यापकवह्निसमानाधिकरणेंधनवानित्यादौअखंडव्याप्तेरप्रसिद्धावपिनक्षतिः॥खंडशःप्रसिद्धत्वात् रामः
व्याप्तिघटकीभूतपदार्थानांपयोक्तक्रमेणनिवेशात्॥साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञानहेतुतायामपिसाध्यताव ७

या त

छेदकावच्छिन्नसाध्यनिष्ठावच्छेदकतात्वन्निरूपिकाभावत्वावच्छिन्नावच्छेदकतातन्निरूपकाधिकरणतात्वावच्छिन्नावच्छेद
कतातन्निरूपिकाधेयतात्वावच्छिन्नावच्छेदकतान्निरूपिकाभावत्वावच्छिन्नावच्छेदकतातन्निरूपकत्वमेव निवेश्यं।। व्या
प्तिघटकीभूतपदार्थानां विशृंखलोपस्थितिवलात् विशेष्यविशेषणभावमितिरीत्याव्यासादिकमवगाहमानानन्तु परा
मर्शादनुमितिस्तु रथे तु व्याप्तिप्रकारतानिरूपितत्वमेव हेतुप्रकारतायां निवेश्यं।। न तु तदवच्छिन्नत्वमपि। व्याप्तिविशिष्टवै
शिष्ट्यबोधीयप्रकारतायाः एव व्याप्यत्वावच्छिन्नत्वात्। अन्यथापि वास्तवव्याप्तिप्रकारतायान निवेशः।। अपितु हेताव तु
च्छेदकप्रकारतानिरूपितायाः हेतुप्रकारतातन्निरूपिताधिकरणप्रकारताद्वयेवं रीत्याव्याप्तिघटकपदार्थस्तोमस्य निवे
शः अन्यतो[illegible]न प्रवेशात्तु पपत्तिः।। न च प्रकारताविशेष्यतयोरेव निरूप्यनिरूपकभावाभावात् हेत्वादिप्रकारतायाः कथं हे
तुतावच्छेदकप्रकारतादिनिरूपितत्वमिति वाच्यं।। अधिकरणादिनिष्ठविशेष्यतानिरूपितप्रकारतायाः स्वहेतुतावच्
छेदकादिप्रकारतानिरूपितविशेष्यतात्मकत्वेनानुपपत्त्यभावात्।। वस्तुतो विशेष्ये विशेषणमिति रीत्यायत्र धूमपराम

अनु॰ र्शे सत्त्वहितीयस्वरूपो विशिष्टवैशिष्ट्यबोधात्मकपरामर्शोऽस्त्येवो बाधकाभावात्तृतीयस्वरूपोऽनुमितिसिद्धान्तीयतेऽ एवं च व्याप
८ त्वावच्छिन्नहेतुप्रकारताशालिज्ञानत्वेनैव हेतुताभ्युपेयते॥ अयोपदर्शितावच्छेदकताना[illegible]वच्छिन्नावच्छेदकतानिरूपकत्वेन
8 प्यव्याप्यत्वावच्छिन्नस्योपदर्शितरीत्यानिवेशनीयत्वे व्याप्तिप्रकारतानिरूपितत्वेन तुल्यशरीरतया लाघवानवकाशे हे न३
त्वाविलंबकत्वमनस्यायं॥ न च व्याप्तिप्रकारतानिरूपितहेतुप्रकारताशालिज्ञानत्वेन हेतुत्वे हेतुप्रकारतानिरूपित
व्याप्तिप्रकारताशालिज्ञानत्वादिना हेतुतामादायाविनिगमनाविरह इति वाच्यं॥ भवन्मतेऽपि तादृशव्याप्तिनिष्ठाव
च्छेदकतानिरूपकहेतुप्रकारताशालित्वेन हेतुप्रकारतानिरूपितव्याप्तिनिष्ठावच्छेदक[illegible]ताशालित्वेन वा हेतुत्व
मित्यत्राविनिगमनाविरहस्य तुल्यत्वात्॥ न च विषयत्वेन समं तादृशज्ञानस्य साक्षात्संबंधो न तु विषयतानिरूपिता
वच्छेदकतयापि॥ एवं च तादृशावच्छेदकताशालित्वेन हेतुत्वे तस्याः स्वनिरूपकविषयत्वप्रतियोगिकत्वरूपपरंप राम॰
रासंबंध एव निवेश्यः॥ तादृशप्रकारताशालित्वेन हेतुत्वे च हेतुप्रकारतायाः प्रतियोगित्वरूपसाक्षात्संबंध इति वि

निगमकसंभवइतिवाच्यं॥ तन्निष्टविषयतावच्छेदकतायाअपितदीयविशेष्यतानिरूपितप्रकारतात्मकतयाँवच्छेदकता
याँपिप्रतियोगितात्संबंधेनविशेषणत्वसंभवात् केवलेविशेष्येविशेषणमितिरीत्याव्याप्त्यवगाहिज्ञानेसाधारणव्या
प्यादिप्रकारतेपेवव्याप्त्यादिविशिष्टवैशिष्ट्यबोधस्यतत्प्रकारत्वोपपत्तेः व्याप्त्यादिनिष्टायांविषयतावच्छेदकतायांप्र
कारतात्वमप्रामाणिकमिति तु विशेष्येविशेषणमितिरीत्यातदवगाहिज्ञानीयविषयतायास्तादृशिष्टवैशिष्ट्यबोधत्व
व्यापकत्वस्यवक्तुंशक्यत्वात्॥ तदेवदर्शितमन्यत्र। पक्षतोव्याप्यत्वावच्छिन्नायाहेतुतावच्छेदकावच्छिन्नप्रकारतानवच्छि
लिज्ञानत्वेनहेतुत्वेपक्षव्याप्तिधर्मत्वयोरेकत्रद्वयमितिरीत्यैवहेतुनिष्ठप्रकारतायामवच्छेदकत्वंन तु धर्मत्वस्यव्याप्ति
धर्मितावच्छेदकत्वंतत्रतादृशपरामर्शोहेतुमित्यापत्तेः॥ नचेष्टापत्तिः। तथासतितादृशज्ञानस्यविरोधज्ञानव्यभिचा
रज्ञानाप्रतिबध्यतयाविरोधव्यभिचारयोर्हेत्वाभासतानुपपत्तेः॥ तस्मात्तद्वारणायव्याप्तिप्रकारतानिरूपितविशे
ष्यतात्वेनधर्मतावच्छिन्नत्वमवश्यंहेतुप्रकारतायांनिवेशनीयं॥ पक्षधर्मत्वादेर्व्याप्तिधर्मितावच्छेदकत्वंतत्स्यप्रा

अनु॰
९

पधूमादिप्रकारताया एव व्याप्तिप्रकारतानिरूपितविशेष्यतात्वेन धूमत्वावच्छिन्नत्वात्। उपदर्शितज्ञानीयधूमविशेष्यतायां
व्याप्तिप्रकारतानिरूपितविशेष्यतात्वधूमत्वावच्छिन्नत्वयोः सत्वेपि तस्याः तादृशविशेष्यतात्वेन न धूमत्वावच्छिन्नत्वम
पि तु धूमप्रकारकतात्वादिनैवेति तादृशज्ञानादनुमित्यापत्तिः। इत्थं च व्याप्यत्वावच्छिन्नत्वनिवेशनमफलमेवेति चेत्तान
व्याप्यत्वावच्छिन्नत्वस्य प्रकारतायां अनिवेशने वह्निव्याप्तितदभाववद्धूमवान्पर्वत इत्याकारकाद्वह्निव्याप्यसंशयसंश
यात्मकात्तदनुमित्यापत्तिवारणाय तद्देशे निश्चयत्वमधिकं निवेश्यं। अस्मन्मये तु तादृशसंशयात्मकज्ञानीयधूम
मादिप्रकारताया व्याप्यत्वावच्छिन्नत्वविरहादेव न तदुत्तरमनुमितिप्रसंगो येन तद्देशे निश्चयत्वनिवेश इति लाघवं।
न च धूमो वह्निव्याप्य इत्येतादृशविशेषणतावच्छेदकप्रकारकनिश्चयो[illegible]नेरोत्तरस्य व्याप्यभावांशे आहार्यतया वि
धसंशयस्य व्याप्यत्वावच्छिन्नप्रकारताशालित्वे बाधकाभावा[illegible]त्तत्र च तादृशप्रकारतानियामकसामग्र्याः सत्वादि
तिवाच्यं। आदिविशिष्टदेशिशिष्यवोर्धप्रतिग्राहार्यानाहार्यसाधारणविशेषणतावच्छेदकाभावप्रकारक[illegible]ज्ञानाभाव एम॰
९

स्य कार्यसहवर्त्तित्वेन हेतुत्वोपगमात्।। तत्र कार्यकाले तथाविधसंशयसत्वे तादृशज्ञा [redacted]
न स्यात् तथाविधप्रकारताशालित्वाभावात्।। एतद्धादिमे देनानेन तत्परामर्शकारणतायां व्या
प्यंशे निश्चयत्वनिवेशापेक्षया तद्विशिष्टवैशिष्ट्यबोधे तदभावप्रकारकसंशयाभावहेतुताकल्पनस्यैवोचितत्वात् तत्र
यत्तद्विशिष्टवैशिष्ट्यबुद्धिं प्रति तदभावप्रकारकसंशयस्य प्रतिबंधकत्वे विशेष्ये विषयताभितिरीत्या तत्प्रकारकज्ञानसा
धारणतत्प्रकारतानिरूपितप्रकारताशालिबुद्धित्वमेव प्रतिबध्यतावच्छेदकमित्युच्यते।। एवं विशेष्ये विशेषणमि
तिरीत्या [redacted] पि वह्निव्याप्यत्व तदभाववदुभयवान् इत्याकारकं न ज्ञानमुत्पद्यते।। कार्यकाले व्याप्यता
भावप्रकारकज्ञानस्य प्रतिबंधकसत्वादिति व्याप्यत्वावच्छिन्नतस्य हेतुप्रकारतायामनिवेशोपि व्याप्यंशे नि
श्चयत्वनिवेश इति चेदेवमपि हेतुप्रकारतायां व्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यतात्वेन धूमत्वावच्छिन्नत्वेन नि
वेशनीये व्याप्तिनिष्ठप्रकारतात्वेन तादृशप्रकारतासामान्यस्यानिवेशापेक्षया व्याप्तिनिष्ठावच्छेदकता [redacted] तेनावच्छि

अनु° दकत्वारव्यप्रकारतामात्रनिवेशेतदितरप्रकारतायाअनिवेशएवोचितः॥नचविशेष्येविशेषणमितिरीत्यापरामर्शव्यावृत्त
१० त्वेपराजनकत्वेतादृशपरामर्शादनुमित्युत्पादसंदेहेनव्यभिचारसंदेहेहेतादृशपरामर्शसाधारणत्वेपराजनकताकल्पन
मेवोचितमितिवाच्यं॥लाघवसत्वेव्यभिचारसंदेहस्याकिंचित्करत्वात इतिविशिष्टवैशिष्ट्यावगाहिपरामर्शएवानु
मितिहेतुरितिदिक्॥वह्निव्याप्यधूमवानयंपर्वतइत्यादिसंशयादनुमित्यापत्तिवारणायप्रकारतावच्छेदककोटौ
निश्चयत्वनिवेशः॥अथात्रनिश्चयत्वंनवह्निव्याप्यधूमाभावाप्रकारकत्वं॥वह्निव्याप्यधूमवान्महानसीयधूमाभाव
वांश्चपर्वतइत्याकारकधूमविशेषाभावावगाहिज्ञानादनुमितिर्नस्यात्।धूमत्वावच्छिन्नप्रतियोगिताकाभावाप्रकार
त कत्वनिवेशेप्येवंदोषतादवस्थ्यं॥महानसीयविशिष्टधूमत्वस्यधूमत्वानतिरेकितयातदवच्छिन्नप्रतियोगिताकाभाव
स्यापिधूमत्वावच्छिन्नप्रतियोगिकत्वात्॥नचशुद्धधूमत्वावच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वनिवेशान्नदोष रम°
॥शुद्धधूमत्व निष्ठावच्छेदक[redacted]तं तु धूमत्वनिष्ठनिरवच्छिन्नावच्छेदकताकत्वं॥यत्रमहानसीयत्वादिविशिष्टधू १०

त्व२

मत्वनिष्ठावच्छेदकतात्तत्र महानसीयत्वादिरूपस्यावच्छेदकविशेषणस्यावच्छेदकतयाधूमत्वनिष्ठावच्छेदकतापि सावच्छि
न्नत्वादित्वादिति वाच्यं॥ एवं सति वह्निव्याप्यत्वावच्छिन्नसामान्याभाववद्वह्निव्याप्यधूमत्वावच्छिन्नसामान्याभावकोटिकसंशय
स्य तत्प्राप्यवारणात्॥ न च व्याप्तिभिन्नत्वे सति धूमत्वभिन्नो यो धर्मस्तदनवच्छिन्नप्रतियोगिताकाभावाप्रकारकत्वं ग्रहे तेति
ग्रुयतां महानसीयत्वविशिष्टधूमत्वावच्छिन्नाभावप्रतियोगितायां महानसीयत्वविशिष्टधूमत्वस्य धूमत्वविशिष्टम
हानसीयत्वस्य वावच्छेदकत्वमिति विनिगमनाविरहेण महानसीयत्वादेरप्यवच्छेदकतया तादृशाभावोऽव्याप्तिभिन्नत्वे स
ति धूमत्वभिन्नो यो धर्मस्तदनवच्छिन्नप्रतियोगिताक एवातो न तत्प्रकारकोक्तज्ञानासंग्रहः॥ व्याप्तिविशिष्टधूमत्वावच्छि
न्नाभावश्शुद्धधूमत्वावच्छिन्नाभावश्शुद्धव्याप्यत्वावच्छिन्नाभावाश्च तथाविधधर्मान्तरानवच्छिन्नप्रतियोगिताका एवा
तोऽनोक्तकोटिकसंशयसाधारणमिति वाच्यं॥ समनियताभावानामभिन्नतया धूमत्वावच्छिन्नाभावस्यापि स्वसमनि
यतधूम[redacted]त्वप्रकारकप्रमाविशेष्यत्वावच्छिन्नप्रतियोगिताकाभावरूपतया व्याप्तिधूमत्वातिरिक्तधर्मावच्छिन्नप्रति

अ·सि· योगिताकत्वात्तादात्म्याविधर्म्मानवच्छिन्नप्रतियोगिताकाभावस्येवाप्रसिद्धेः॥ यदि च धूमत्वावच्छिन्नाभावस्यापि धूमत्व
११ प्रकारकप्रमाविशेष्यत्वावच्छिन्नाभावाभिन्नत्वेपि तत्प्रतियोगिताद्वयीरूका धूमत्वावच्छिन्नापराच धूमत्वप्रकारकप्र
माविशेष्यत्वावच्छिन्नावच्छेदकभेदेन प्रतियोगिताभेदात॥ एवं च धूमत्वावच्छिन्नप्रतियोगिताया व्याप्तिधूमत्वाति
रिक्तधर्मानवच्छिन्नत्वात्तादृशप्रतियोगिताकत्वं तथाविधस्याभावस्याहृतमेवेति मन्तेत्तदा महानसीयत्वा
द्यवच्छिन्नप्रतियोगितान्यतयाधूमत्वान्यधर्मानवच्छिन्नत्वात्॥ न च महानसीयत्वाद्यवच्छिन्नधूमाभावप्रतियोगिता
यां भिन्नयोर्विशेष्यविशेषणभावानापन्नधूमत्वमहानसीयत्वयोर्व्यासज्यवृत्त्यवच्छेदक[redacted]त्वस्वीक्रियते नतु सा
मानाधिकरण्यसंबंधेनैकविशिष्टापरस्य सामानाधिकरण्यप्रवेशाधिकोनगौरवात्॥ एवं तादृशाभावप्रतियोगिता
या महानसीयत्वाद्यवच्छिन्नत्वनियमेनत्तस्य[redacted]धूमत्वान्यधर्मावच्छिन्नप्रतियोगिताकत्वमिति वाच्यं॥ अ
वच्छेदकतापर्याप्त्यसज्यवृत्तित्वस्याप्रत्ययदूषितत्वात्॥ एकविशिष्टापरस्यावच्छेदकत्वात्। यत्तु अभावपदमीतोप्रति राम· ११
धूमाभावादेरपितादृशप्रतियोगिताकत्वमक्षतमेवतादृशाभावीयमहानसीयत्वविशिष्टधूमत्वावच्छिन्नप्रतियोगितापाधूमत्वविशिष्टमहानसीयत्वे

योगिविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकत्वमिति वा प्रतियोगितावच्छेदकविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकेऽदे
तावच्छेदकत्वनियमः॥ तद्दण्डी नास्तीत्यादौ प्रतियोगितावच्छेदकदण्डादौ न तादृशविशेषणतयाभानात्॥ एवंच महानसीय
धूमो नास्तीत्यादौ धूमांशे एव महानसीयत्वादिविशेषणविशिष्टत्वेनाधूमत्वांशे महानसीयत्वाद्यप्रकारत्वात्कथं महा
नसीयत्वादेर्धूमत्वनिष्ठावच्छेदकतावच्छेदकत्वमिति तत्त्वं सत्॥ सामानाधिकरण्यातिरिक्तसंबंधेन पत्रावच्छेदकता
वच्छेदकत्वं तत्रैव तथात्वनियमात्॥ अवच्छेदकविशिष्टधर्म्मिविशेषणतयाभासमानधर्मस्यापि सामानाधिक लि५
रण्यसंबंधेनावच्छेदकतावच्छेदकत्वे बाधकाभावात्॥ प्रतियोगिविशेषणतयाभासमानस्य प्रतियोगितावच्छे
दकत्वनियमात् महानसीयत्वादेरपि प्रतियोगितावच्छेदकत्वमावश्यकमिति चेदि[illegible]त एव विनिगमनाविरहे
ण धूमत्वविशिष्टमहानसीयत्वादेरपि प्रतियोगितावच्छेदकत्वं॥ उच्यते॥ व्याप्तिनिष्ठावच्छेदकताभिन्नासतीयधू
मत्वनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकप्रतियोगिता सर्वथावच्छिन्नप्रकारतानिरूपिताभावप्रका

व्यु॰ रतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकान्यत्वमेव धूमपरामर्शीयानिरूप्यत्वं॥ एवमन्यत्रापि बोध्यं॥ वह्निव्या
१२ प्यधूमवान्पर्वतो महानसीयधूमाभाववांश्चेत्यादिसमूहालंबनेच प्रतियोगितासंबंधावच्छिन्नधूमत्वावच्छिन्नप्र
कारतायां महानसीयत्वादिकमवच्छेदकं॥ न तु धूमत्वनिष्ठप्रकारतावच्छेदकतापि विषयतानिरूपितस्यावच्छेदक
त्वसत्त्वान्निरूपितप्रकारताविशेषात्मकतया तद्दोषप्रकारीभूतधर्मस्यैव तन्निष्ठविषयतावच्छेदकत्वात्॥ एवं च तादृश
ज्ञानीयप्रतियोगिप्रकारताया धूमत्वनिष्ठावच्छेदकताभिन्नमहानसीयत्वनिष्ठावच्छेदकतानिरूपकत्वादुपदर्शितावच्छे
दकत्वानिरूपकप्रतियोगिप्रकारतानिरूपिताभावप्रकारतानिरूपितत्वपर्वतत्वाद्यवच्छिन्नविशेष्यताकान्यत्वेन तस्याः तत्
मेव॥ वह्निव्याप्यत्वतद्विशिष्टधूमत्वावच्छिन्नाभावकोटिकसंशयवारणाय व्याप्तिनिष्ठावच्छेदकताभेदः प्रतियोगि
कोटौ निवेशितः॥ एतेनवात्तवधूमत्वावच्छिन्नाभावप्रकारकत्वनिवेशे द्वयाभाववत्तादिनाधूमाभावप्रकारक राम॰
समूहालंबनस्यासंग्रहः॥ धूमाभाववत्तादिनाद्वयाभावकोटिकसंशयस्यसंग्रहश्चेत्यपि निरस्तं॥ उपदर्शितनिश्चयत्व १२

13

शरीरे वा लव धूमत्वावच्छिन्नाभावविषयतायाश्च निवेशात्त ॥ धूमत्वादिनिष्ठावच्छेदकता च निरवच्छिन्ना यथा तथा ॥ अ
तो जातिविशेषत्वादिना धूमत्वाद्यवगाहिनो जातिविशेषवद्भाववान् वह्निव्याप्यधूमवांश्च पर्वत इत्याकारकस्य ना
संग्रहः ॥ तादृशप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपिताभावप्रकारतास्तन्मात्रस्य निवेशे धूमाभाववद्
दृश्यं वह्निव्याप्यधूमवान्पर्वत इत्यादिनिश्चयासंग्रहः अतस्तादृशप्रकारतानिरूपितपर्वतत्वा[illegible] वच्छिन्नविशेष्यताका
मत्वपर्यंतप्रवेशः ॥ वह्निव्याप्यधूमवान् वह्निव्याप्यधूमवह्निवः पर्वत इत्यादिसंशयवारणाय व्याप्ति[illegible]नि – ष्टा
वच्छेदकत्व धूमत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकतानिरूपकं यत्किंचिद्धर्मावच्छेदकत्वं तद्धर्मातिरिक्तावच्छेदकतानि
रूपप्रतियोगिप्रकारतानिरूपितभेदप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकात्मत्वमपि निवेश्यं । व
ह्निव्याप्यधूमवान्पर्वतो धूमवान्न महानसभिन्न इत्याकारकनिश्चयसाधारणाय च धूमत्वव्याप्तिनिष्ठावच्छेदकता
भावच्छेदकतानिरूपकं यदवच्छेदकत्वं तन्निरूपकताकत्वमुपेक्ष्य तादृशावच्छेदकतातिरिक्तावच्छेदकतानिरूपक

छिन्नाव

अनु· १२

13

त्वे प्रतियोगिप्रकारतायां निवेशितेः। वस्तुतस्तु वह्निव्याप्यधूमवान् इत्यभावबाध्यपर्वत इत्येतादृशसमुच्चयादनुमितित्व
त्यत्रपि उपदर्शितरीत्या प्रकारतानिरूपिताभावप्रकारताया धूमनिरूपितविरोधावच्छिन्नत्वमप्यवश्यं निवेशनीयं।।
समुच्चये कोटिप्रकारताया विरोधस्यानवच्छेदकत्वान्न तत्संग्रहः। एवं च व्यासादिनिष्ठावच्छेदकताभिन्नावच्छेदकता
निरूपकप्रतियोगिप्रकारतानिरूपितत्वं न तत्र निवेश्यते।। प्रयोजनाभावात्। वह्निव्याप्यधूमवान्महानसीय
धूमाभाववांश्च पर्वत इत्यादिज्ञानीयाभावप्रकारताया धूमनिरूपितविरोधानवच्छिन्नतया न तत्संग्रहासङ्गतेः।। नच
वह्निव्याप्यधूमवान्पर्वतो महानसीयधूमवांश्च वा इत्याकारककोशिकसंशयात्मकपरामर्शीयाभावप्रकारतायां महा
नसीयधूमनिरूपितविरोधावच्छिन्नाया स्तादृशविरोधस्यापि धूमनिरूपितत्वात् तत्संग्रहो दुर्वार एवेति वाच्यं।। धूमा
धिकरणवृत्तित्वसामान्याभावत्वरूपविशेषावच्छिन्नत्वस्यैव निवेशनीयतया महानसीयधूमाधिकरणवृत्तित्वसा
मान्याभावत्वरूपविरोधावगाहिन उक्तपरामर्शस्य संग्रहसंभवात्।। न चैवं वह्निव्याप्यत्वावच्छिन्नाधिकरणवृत्तित्वसा रघ· १२

विशेषावगाहिनो वह्निव्याप्यत्वावच्छिन्नाभावकोटिकसंशयस्यापि संग्रहप्रसंगः ॥ तादृशविरोधस्यापि धूमाधिकरण
वृत्तित्वसामान्याभाववत्त्वविरोधाघन्यत्वादिति वाच्यं ॥ वह्निव्याप्यवद्वृत्तित्वधूमवद्वृत्तित्वावच्छिन्नात्मकविरोधि
निष्ठावच्छेदकतानां वह्निव्याप्यत्वधूमनिष्ठावच्छेदकताभिन्नावच्छेदकतानिरूपकाधिकरणनिष्ठावच्छेदकतानिरूप
काधेयत्वनिरूपकताभाववत्त्वावच्छिन्नावच्छेदकतात्वेनानुगमय्य प्रवेशेन वह्निव्याप्यत्वावच्छिन्नकोटिकसंशयवा
रणासंभवात् ॥ न च तत्र वह्निव्याप्यधूमवान्पर्वतो महानसीयधूमवान्न वे [redacted]
त्यादिकसंशयस्य एवं महानसीयधूमाभावाद्यंशे धूमवद्वृत्तित्वसामान्याभाववत्त्वस्य विरोधस्याभानेन तादृशज्ञानाद
नुमित्यनुदयप्रसंग इति वाच्यं ॥ किंतु उद्दत्वेनस्यागृहीतपुरुषत्वधूमत्वजलत्वादिरूपभावद्वयकोटिकज्ञानस्यैव
तादृशज्ञानस्यापि धूमत्वांशे वह्निव्याप्यत्वांशे संशयत्वोपगमात् ॥ तदनंतरमनुमित्यनुत्पादस्य इष्टत्वात् ॥ एवं च वि
रोधावच्छिन्नप्रकारतात्वेन धूमासंतानाभाववत्त्वद्वन्योन्याभावप्रकारतानामनुगमात् अन्योन्याभावकोटिकसंशयपवा

न्यानु. रणाप्रविशेषणांतरस्यैवैशेष्यनिरूपकत्वा॥ केचित्तु संसर्गस्य साधारण्याय विरोधावच्छिन्नत्वमभावप्रकारतायां न निवे
१४ श्यते किंतु अभावप्रकारत्वाविछिन्नेपि तत्तत्प्रकारतानिरूपितविशेष्यताशालिज्ञानत्वेनैव हेतुत्वाभ्युपगमात्॥ स
मुच्चयादिज्ञानस्य उभयाभावप्रकारकत्वेपि तत्प्रकारताभेदेन विशेष्यताभेदात् तद्दीपधर्मप्रकारतानिरूपित
14 विशेष्यतायास्तदभावप्रकारत्वाविछिन्नेपि तत्तत्प्रकारतानिरूपितविशेष्यतात्वेनानुपपत्त्यभावात्॥ संशयेतु विरुद्धोभ
यभयकोटिप्रकारतानिरूपितापरैकैव विशेष्यताजनोन तस्मात्तदनुपपत्तिः॥ न चैकत्रद्वयमितिरीत्या उभयविशेष
णाकबोधे प्रकारताभेदेन विशेष्यताभेदोवश्यमंगीकर्तव्यः॥ अन्यथा समूहालंबनात्तादृशज्ञानवैलक्षण्या
नुपपत्तेः॥ एवं च एकत्रद्वयमितिरीत्या धर्मतदभावोभयविषयकसमुच्चयादनुमित्यनुदयापत्तिरितिवाच्यं॥
एकत्रद्वयमितिरीत्या विरुद्धभावाभावोभयकोटिकज्ञानस्य संशयत्वानभ्युपगमात् तत्रसंशयत्वात्॥ न चैवं
तदभावे तद्दृश्यमोन्याभावप्रकारकाद्वृत्तित्वाभावतदधिकरणवृत्तित्वमित्यनुपविरोधयोरनुगमासंभवेन शुद्धे राम. १४

तयोरनुगमायविरोधावच्छिन्नत्वनिवेशंमावश्यकं॥ एकत्रहृदमितिरीत्याधूमतद्वेरोभयविशेषणकपरामर्शसंभ
हृदिपाव्रतियोगिविषयतामनिवेश्याभावप्रकारतात्वेनतयोरनुगमासंभवाइतिवाच्यं॥ तदधिकरणवृत्तित्वा
भावतदधिकरणवृत्तिभिन्नत्वरूपविरोधयोरनुगमासंभवेनप्रत्येकंतन्नद्वच्छिन्नत्वतत्पस्यनिवेशनीयतयातद
वेहृदपालाद्यवेनविशेष्यतायोमेवतदभावप्रकारत्वानिरूपितत्वतद्वद्व्योम्याभावप्रकारतानिरूपितत्वयोःपृ
थकनिवेशपितृमुचितत्वादितिचेत्न॥ तत्सत्त्वे॥ वह्निव्याप्यधूमवान्पर्वतोजलत्ववान्द्रव्याकारकभावद्वयकोटिकसं
शयवारणासंभवात्॥ विरोधावच्छिन्नप्रकारतात्वेनाविविशेषविकोटिप्रकारतानामनुगमस्यावश्यकत्वात्॥ तत्वे
कसंबंधवृद्दिनविरोधावच्छिन्नापरसंबंधावच्छिन्नविरोधिजनत्वादिप्रकारताशालिपरामर्शसंग्रहायधूमवद्दसम
स्यावश्यकत्वात्द्विरूपविरोधावच्छिन्नसमवायादिसंबंधावच्छिन्नप्रकारता त्वेजनत्वादिप्रकारतानिवेशनीया
। तथाचकथंतेनरूपेणविशेषणताविशेषघटितविशेषावच्छिन्नतत्संबंधावच्छिन्नप्रकारतात्वेनतदभावतद्व

ऽन्योन्याभावप्रकारतायाः संग्रह इति वाच्यं॥ विशेषणताविशेषत्ववृत्तितद्विरोधावच्छिन्नतन्नत्संबंधेन पत्वइत्यत्वाभावादिवीज
लत्वादिरेव वा कोटिः तादृशसंशयवारणाय तथाविधविरोधावच्छिन्नतत्संबंधावच्छिन्नप्रकारतात्वेन तादृशप्रकारतासं
ग्रहात्॥ यत्तु तदभाववत्त्वद्वदन्योन्याभावकोटिकस्तत्संशयएवाभ्युपेयते स्थाणुर्वा पुरुषो वेति संशयस्य स्थाणुत्वतदभाव
पुरुषत्वतदभाववत्त्वपवत्तकोटिकएवेति॥ तन्न॥ अभावकोटिभासकसामग्र्यसत्वेप्रत्येकसामग्रीसत्वाद्भावमात्रकोटि
कसंशयेबाधकाभावात्॥ वस्तुतः संशयेपिप्रकारभेदेन विशेष्यताभेदस्य व्यवस्थापितत्वात्तान किंचिदेतत्॥ अपप
दृतावच्छेदकसामानाधिकरण्येन धर्मधर्माभावापुभयकोटिकव्याप्यवत्ताज्ञानादनुमित्यनुदयापत्तेः॥ उपदर्शितानि
श्चयत्वस्यतत्प्राधारणपविरहात्॥ नचतादृशज्ञानस्यसंशयत्वेपिनजायतएवततोऽनुमितिरिति वाच्यं॥ यतस्तादृशाज्ञा
नस्यसंशयत्वेतत्प्रकारकानुमितौतदभावव्याप्यवत्ताज्ञानप्रतिबंधकत्वेपि पक्षतावच्छेदकसामानाधिकरण्यमात्रेणो
भयकोटिकव्याप्यवत्ताज्ञानादनुमितिः संशयात्मिकासंभवति॥ सामानाधिकरण्यमात्रावगाहितथाविधतदभावव्याप्यव

त्वात्तानस्याप्यवच्छेदकतावच्छेदेनवह्न्यनुमितिंप्रत्यविरोधित्वादितियथाश्रुतंतुतदभाववद्व्याप्यवत्ताज्ञानप्रतिबंधकतयासंशया
नुमितिवारणायेंगतिः॥ तस्मादवच्छेदकावच्छेदेनेकतरकोट्यवगाहिज्ञानएवसंशयत्वेनोपदर्शितपरामर्शानुमितिजी
पतएव॥ नवैवंपक्षतावच्छेदकावच्छेदेनविरोधिप्रकारकज्ञानान्यत्वमेवनिवेशनीयमितिनानुपपत्तिरितिवाच्यं॥ तथासतिपक्ष
तावच्छेदकसामानाधिकरण्यमात्रेणाविरोधिकोटिमवच्छेदकावच्छेदेनव्याप्यकोटिमवगाहमानात्संशयादनुमित्यापत्तेः
॥ नवसामानाधिकरण्यावगाहिव्याप्यवत्तानिर्णयत्वेनहेतुताप्रोपदर्शितस्थलेसंशयादनुमित्यापत्तिः। अवच्छेदकाव
च्छेदेनहेतुमत्ताज्ञानाद्यावच्छेदकावच्छेदेनानुमितेरेवोत्पत्त्योत्तत्रहेतुत्वांतरकल्पनायामानर्थक्यात्॥ तत्संग्रहस्याकिं
चित्करत्वमितिवाच्यं॥ सामानाधिकरण्यमात्रावगाहिबाधादिज्ञानेऽवच्छेदकावच्छेदेनहेतुमत्ताज्ञानमादपिसामानाधि
करण्यमात्रावगाह्यनुमितेरेवोदयात्॥ तत्संग्रहस्यावश्यकत्वात्॥ यत्तुस्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताव
च्छेदकीभूतप्रकारताशून्यत्वस्वनिरूपकत्वोभयसंबंधेनधर्मप्रकारतावज्ज्ञानत्वंधर्मेनिश्चायकत्वं॥ अवच्छेदकावच्छेदेनधर्म

अप॰ वा॰ १६ भावाद्यवगाहि धूमवत्ताज्ञानं सामानाधिकरण्यमात्रेण धूमाभावाद्यवगाह्यवच्छेदकावच्छेदेन धूमवत्ताज्ञाने च यादृशधू
मप्रकारतानिरूपकं न तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतधर्मप्रकारताशत्वं धूमप्रकारताज्ञानसा
मान्यं प्रत्यवच्छेदकावच्छेदेन धूमाभावादिप्रकारताशालित्वेन प्रतिबंधकत्वात्। तादृशज्ञाननिष्ठतधूमाभावादिप्रकारतायाधूम
10 प्रकारतासामान्यावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात्।। अवच्छेदकावच्छेदेन धूमादिप्रकारकज्ञानत्वा
वच्छिन्नं प्रति सामानाधिकरण्येन धूमाभावप्रकारताशालित्वेन प्रतिबंधकत्वात्।। सामानाधिकरण्यमात्रेण धूमाभा
वादित्रपसंशयज्ञानीयधूमाभावादिप्रकारताया अवच्छेदकावच्छेदेन धूमवत्ताज्ञानीयधूमप्रकार[redacted]ता
तिशयेन प्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात्। यत्र च सामानाधिकरण्यमात्रेण धूमधूमाभावोभयमात्रप्र
कारतातादृशज्ञानस्योपदर्शितसंबंधेन धूमप्रकारताकत्वमस्तु समेवा सामानाधिकरण्येन धूमादिप्रकारकबुद्धौ सामाना राम॰
धिकरण्यमात्रेण धूमाभावादिप्रकारकबुद्धेरविरोधितया तादृशज्ञानीयधूमाभावादिप्रकारतायास्तदीयधूमप्रका १६

रणावच्छिन्नप्रतिवध्यतानिरूपितप्रतिबंधकतानवच्छेदकत्वादिति तद्रसत ॥ प्रतिबंधकत्वादेरनन्यथासिद्धत्वेपि तत्सर्ववस्त्रि
त्वादिकारणत्वादिघटितत्वेनाननुगमात ॥ अथोच्यते ॥ सामानाधिकरण्यमात्रावगाह्यनुमितावववच्छेदकावच्छेदेन विरो
धिप्रकारकान्यसामानाधिकरण्यमात्रावगाहिधूमवत्ताज्ञानत्वेन हेतुता ॥ नचावच्छेदकावच्छेदेन हेतुमत्ताज्ञानासत्त्वे
रं सम्यगिति तदुक्तंरागितिवाच्यं ॥ अवच्छेदकावच्छेदेनानुमितौ तादृशहेतुमत्ताज्ञानस्य हेतुतापत्त्यावश्य [redacted]
कत्वादिति ॥ सामानाधिकरण्यमात्रावगाह्यनुमितिसाधारणवह्निनिधेय
कानुमितित्वस्यैवावच्छेदकत्वविषयतामनिवेश्यतज्जन्यतावच्छेदकत्वोपगमात् ॥ न द्रसंग्रहस्योदोषत्वात् ॥ नचैवं सामा
नाधिकरण्यमात्रावगाहिबाधकालीनापामवच्छेदेन हेतुमत्ताज्ञानजन्यसामानाधिकरण्यमात्रावगाह्यनुमितौ सामा
नाधिकरण्यमात्रावगाहिहेतुमत्ताज्ञानस्य सामानाधिकरण्यमात्रावगाहिहेतुमत्ताज्ञानजन्यतया विधानुमितौ ॰
अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य व्यभिचारइतिवाच्यं ॥ अन्यलिंगकानुमितौ व्यभिचारवारणाय तत्तत्परामर्शजन्यताव

विविशेषणाभवान्नत्रिरासइत्याहुः॥ तदनन्तरं तेनन्तूपेण हेतुत्वे गौरवात्पर्योत्तमाभावाच्च॥ अथ धूमीत्वपर्वतो वह्निव्याप्यधूमवांश्च पर्वत इ

अ॰सि॰ १२ च्छेदककोटौ तन्नत्वपरामर्शाव्यवहितोत्तरत्वस्य निवेशावश्यकत्वेन तत्तत्पुरुषसर्वीयोपवरणासंभवात्॥ केचित्तु अवच्छिन्नवि
शेषणतासंबंधावच्छिन्नधूमाभावादिप्रकारतास्त्वन्यत्वे सति शुद्धसंयोगादिसंबंधावच्छिन्नधूमप्रकारतास्त्वन्यत्ववि
शिष्टधूमाभावादिप्रकारत्वाभाववत्त्वमेव उभयपरामर्शसाधारणं निष्पत्तं॥ सामानाधिकरण्येनोभयप्रकारता
17 शालिनिश्चये धूमाभावादिप्रकारतासत्त्वेपि तादृशशुद्धसंयोगादिसंबंधावच्छिन्नधूमप्रकारतास्त्वन्यत्वतद्विशेष
णाभावेन तद्विशिष्टधूमाभावादिप्रकारताभाववत्त्वमस्य तमेव॥ पर्यावच्छेदकावच्छेदेन धूमाभावादिप्रकारसामाना
धिकरण्येन मात्रेण धूमप्र [redacted] कारत्वतादृशविशिष्टाभावसत्त्वेन वह्नि
व्याप्यधूमवांश्चेत्याकारकात्पर्वतत्वसामानाधिकरण्येन धूमवत्ताज्ञानादनुमित्युदयापत्तिः तादृशज्ञानेस्यापि
विरोधिप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालित्वेनोपदर्शितनिश्चयत्वासत्त्वात्॥ न च सामानाधिकरण्ये रा॰
नैतदुमवत्ताज्ञानाकारणतायोग्यरूपवत्तात्वावच्छिन्नविशेष्यकविशेषणतासंसर्गकधूमाभावप्रकारताकान्यत्वे १२

वनिवेशनीतया नीलपर्वतत्वावच्छिन्नविशेषणतासंसर्गकधूमाभावादिप्रकारकोपदर्शितज्ञानद्वयोरैवैकासंग्रह इति
वाच्यं ॥ तथा सति नीलपर्वतो वह्निव्याप्यधूमवान्नवेति संशयादनुमित्यापत्तिरिति चेन्मैवं ॥ शुद्धपर्वतत्वसामानाधिकरण्यमा
त्रावगाहिन्या सत्त्वभिन्नतो सामानाधिकरण्यमात्रावगाहिपरामर्शस्य शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितपर्वतत्व
व्यापकविशेषणतासंसर्गावच्छिन्नविरोधिप्रकारताशून्यस्य शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितशुद्धसंयोगावच्छि
न्नधूमप्रकारताशालिज्ञानत्वेन हेतुता अतो नोपदर्शितदोषावसरः ॥ ननु शुद्धपर्वतत्वाद्यवच्छिन्नतस्य हेतुप्रकारता
निरूपितविशेष्यतायां निवेशे नीलपर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शात्पर्वतो न नील इत्यादिबाधकाले पर्वतो
वह्निमानित्याकारिकायाः शुद्धपर्वतत्वावच्छिन्नविशेष्यताकानुमितेरनुदयप्रसंग इति वाच्यं नीलपर्वतो वह्निमा
नित्याद्यनुमितेर्नीलपर्वतत्वाः वच्छिन्नविशेष्यताकपरामर्शहेतुताया आवश्यकत्वात्तत्रैव नीलपर्वतत्वविषयताम
निवेशस्य शुद्धपर्वतत्वाद्यवच्छिन्नप्रकृतानुमितिसाधारणपर्वतत्वावच्छिन्नविशेष्यताकानुमितित्वस्यैव कार्यतावच्छेद

अ॰ मी॰
१८

कत्वाभ्युपगमात् । तादृशकारणतयैव नीलादिमानप्रतिबंधकदशायां उपदर्शितपरामर्शो धूमवत्पर्वतत्वावच्छिन्नविशेष्यताका
नुमितिस्तु सत्त्विः ॥ न च नीलपर्वतत्वावच्छिन्नविशेष्यकधूमपरामर्शजन्यतावच्छेदककोटौ नीलादिविषयतापात्रनिवेशस्तु
द्धपर्वतत्वावच्छिन्नविशेष्यकपरामर्शजन्यानुमितितो न सव्यभिचार इति वाच्यं ॥ अव्यवहितोत्तरत्वनिवेशस्यावश्यकतया व्य
भिचारानवकाशात् ॥ केचित्तु नीलपर्वतो वह्निव्याप्यवानित्याकारकपरामर्शान्नीलादिमानप्रतिबंधकबाधादिदशा
यां न जायत एवानुमितिः न च तत्रानुमितिस्वीकारे क्षतिविरहः । तथा सति ह्रदोनकारणतयैवोपपत्तेः ॥ परामर्शहेतुता
नाधिकोपि लाघवविरहेण तत्रानुमितेरभ्युपगमस्यानिर्युक्तिकत्वात् । न च तत्रानुमित्यनभ्युपगंतृमते तदानीं भिन्नविषय
कप्रत्यक्षोत्पत्तिः स्यात् तदुपपत्तये तत्रानुमितिसामग्रीप्रतिबंधकतायां नीलादिमानप्रतिबंधकताया नीलादिमानप्रतिबंधक
जाया नीलादिमानप्रतिबंधकबाधाभावादिरूपं निवेशनीयः ॥ तत्रानुमितिस्वीकारे तु तदनिवेशे न लाघवं लभ्य
इति वाच्यं ॥ तथाविधपरामर्शदशायां तादृशबाधादिसत्वे धूमवत्पर्वतत्वावच्छिन्नविशेष्यकानुमितिप्रतिबंधकीभूत राम
१८

तथाविधसिद्धेःसत्त्वांभिन्नविषयकत्वप्रकारेभैवन्मतेस्तुतत्संसातादृशपरामर्शवृत्तितानुमितिसामग्रीप्रतिबंधकतायांतथावि
धबाधाभावनिवेशस्यभवतोप्यावश्यकत्वात्।।परंमुतथाविधबाधसत्त्वेऽसत्त्वांशउद्धपर्वतत्वावच्छिन्नविशेष्यकसिद्धेभव
न्मतेऽनुमितेरेवोत्पत्त्यातद्भिन्नाभिन्नविषयकप्रत्यक्षादिवारणायतादृशबाधाभावमनिवेश्यपर्वतोवह्निमानित्याकारक
सिद्ध्यभावंनिवेश्यनीलपर्वतत्वाद्यवच्छिन्नविशेष्यकपरामर्शादिवृत्तितानुमितिसामग्र्याःप्रतिबंधकतांतरकल्पनमाव
श्यकमितिविपरीतमेवगौरवं।।शउद्धपर्वतत्वावच्छिन्नविशेष्यकपरामर्शवृत्तितसामग्रीप्रतिबंधकतायांउक्तयुक्त्या
परामर्शेशउद्धपर्वतत्वावच्छिन्नविशेष्यताकत्वनिवेशस्यावश्यकतयातत्प्रतिबंधकतायाश्चनिर्वाहात्।।एतेनीलपर्वतो
वह्निव्याप्यवानित्यादिपरामर्शादुपदर्शितबाधादिकालेऽनुमितिस्वीकारेऽनुमित्साविशिष्टतादृशपरामर्शवृत्ति
तसामग्रीप्रतिबंधकतायानीलादिभानप्रतिबंधकबाधाभावानिवेशेनलाघवं।।तादृशबाधादिदशायांसत्यामपि
सिद्धेःसिषाधयिषासत्त्वेनतादृशानुमितेरेवोत्पत्त्याभिन्नविषयकप्रत्यक्षादित्यपिपरास्तं।।उक्तयुक्त्यानेनसाम

अ॰ बा॰ ग्री प्रतिबन्धकताधिक्येनादृशलाघवस्याकिंचित्करत्वात् इत्याहुः ॥ अन्ये तु पर्वतो न नील इति बाधनिश्चयकाले नीलपं
१९ र्वतो वह्नि न वह्निमानित्यनुमितिस्वीकारे भिन्नविषयकत्वस्य रूपप्रतिभिन्नविषयकानुमितिसामग्र्याः प्रतिबन्धकतायां पर्व
तो न नील इत्यादिबाधाभावस्यानिवेशनप्रयुक्तलाघवमपि न संभवति। अन्नीलोपं वह्न्यभाववान्नीलाभाववान्वह्न्यभा
19 ववान् व्याप्यधूमवानित्यादिपरामर्शसत्त्वेपि त्यादिनिर्णयपरिशिष्टापरामर्श्याविषयबाधहेतुद्वैरवच्छेदकधर्मदर्शनविषयपा
पर्वतत्वावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धिप्रतिबन्धकतया तदभावनिवेशस्यावश्यकत्वेन तन्निवेशस्यैवौचित्यात् तात्तद
त्निवेशे च तादृशावच्छेदकधर्मदर्शनदशायां भिन्नविषयकप्रत्यक्षाद्युत्पत्तये तदभावनिवेशस्यावश्यकत्वादित्याहुरिति वदन्ति
॥ अत्रेदं बोध्यं ॥ नीलपर्वतो वह्निव्याप्यवानित्यादिपरामर्शात्पर्वतो न नील इति बाधसत्त्वे पर्वतो वह्निमानित्यनुमित्युत्पा
त्ते तादात्म्यादिसंबन्धेन वह्निव्याप्यवन्नीलपर्वतत्वावच्छिन्नहेतुकपरामर्शोद्देश्यपर्वतत्वावच्छिन्नपक्षकवह्न्यनुमितिसामग्र्या भि राम॰
न्नविषयकप्रत्यक्षादिकं प्रति प्रतिबन्धकत्वाकल्पनेन लाघवं तादृशानुमितिजनकीभूतवह्निव्याप्यवह्निव्याप्यवन्नीलप १९

र्वतवान्पर्वत इत्याकारकपरामर्शघटितसामग्रीकाले नीलपर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यवत्तानिर्णयघटितपर्वतत्वा
वच्छिन्नविशेष्यकवह्निविधेयकानुमितिसामग्रीसत्त्वात्तस्या आवश्यकत्वात्तत्त्वप्रतिबंधकतयैवोपपत्तेः॥ अथ पर्वतमुख्यवि
शेष्यकपरामर्शस्यैवानुमितिहेतुतायाः पाकानुमानेऽपि कृधरमिश्रैः कंठरवेणोक्तत्वात्तत्त्वप्रतिबंधकतयैवोपपत्तेः॥ अथ पर्वत
मुख्यविशेष्यकपरामर्शस्यैवानुमितिहेतुतायाः पाकानुमत॥ नीलपर्वतत्वाद्यवच्छिन्नविशेष्यकपरामर्शघटितानु
मितिसामग्रीप्रतिबंधकतायास्तदवच्छिन्नमुख्यविशेष्यताकत्वपरामर्शेऽवश्यं निवेशनीयं॥ एवं चोक्तविशिष्टधर्माव
च्छिन्नहेतुकपरामर्शदशायां नीलपर्वतविशेषणकपरामर्शस्यैव सत्त्वेन नीलपर्वतत्वावच्छिन्नविशेष्यकपरामर्शघटित
सामग्रीनैयत्याभावात्तदुक्तसामग्र्याः प्रतिबंधकत्वान्तरकल्पनायाश्चावश्यकत्वात्तल्लाघवानवकाश इति चेत्॥ एव
मपि उपदर्शितहेतुतावच्छेदकावच्छिन्नविशेष्यकपरविशेषणकपरामर्शदशायां नीलपर्वतत्वावच्छिन्नमुख्यविशेष्यक
परामर्शस्यावश्यकत्वात्तादृशहेतुतावच्छेदकावच्छिन्नविशेष्यकपरामर्शघटितसामग्र्याः प्रतिबंधकत्वाकल्पमपेक्षा

अनु०
२०
20

ष्ठ वस्मानपायात॥ ननु पक्षमुख्यविशेष्यकपरामर्शस्यैव चेदनुमितिहेतुतातदोक्तधर्मावच्छिन्नविशेष्यकपर्वतत्वावच्छिन्नवि
शेषणकपरामर्शस्यानुमितिहेतुतयातादृशपरामर्शघटितसामग्र्याः प्रतिबंधकताकल्पनमस्माकं नास्तीति वाच्यं॥
पक्षमुख्यविशेष्यकपरामर्शस्यैवानुमितिहेतुत्वमित्येतादृशाभिप्रायस्यैतत्रांशे लिंगविशिष्टपक्षविशेषणकपरा
मर्शस्यैवानुमितिहेतुत्वव्यवच्छेदपरतयालिंगविशेष्यकपक्षविशेषणकपरामर्शस्यानुमितिहेतुत्वेऽविवादात्। अन्य
यापरामर्शग्रंथेपि अग्रिमानुमितिलक्षणविचारेह्यधितकारस्योभयविधपरामर्शहेतुतास्वीकारविरोधापत्तेरि
ति॥ आहार्यपरामर्शादनुमित्यनुपपत्तेरनाहार्यत्वकारणतावच्छेदककोटौ निवेशनीयं॥ आहार्यत्वं च बाधेनिरुक्तं॥ अथा
हार्यपरामर्शादनुमित्युत्पत्तौ का क्षतिरिति चेन्न॥ तथा सत्याहार्योभयव्याप्यवत्तानिर्णयदशायां संशयानुमितिः स्यात्
।बाधबुद्धेरिव तदभावव्याप्यवत्तानिर्णयस्याप्यनाहार्यस्यैव तद्विरोधित्वात्। अतएव एककोटिकानुमितिं प्रति अपरको
ट्यनुमितिसामग्र्याः प्रतिबंधकत्वं कल्पनीयमिति तदपेक्षया लाघवादनाहार्यपरामर्शत्वेनानुमितिहेतुताकल्पनमे राम०
२

वोचितं तावदनाहार्यपरामर्शत्वेनानुमितिहेतुत्वे विभिन्नविषयकप्रत्यक्षादिकं प्रत्यनंतानुमितिसामग्र्याः प्रतिबंधकतायां
परामर्शे नाहार्यत्वप्रवेशे गौरवात् ॥ तदनुमितौ तदभाववदनुमितिसामग्र्या एकैकप्रतिबंधकताकल्पनमेवोचितमिति
वाच्यं ॥ भवन्मतेप्याहार्यमप्यव्याप्यवत्तानिर्णयदशायामनुमितेरनुदयात् भिन्नविषयकप्रत्यक्षादेरुत्पत्तावनुपपत्तये
ऽनंतभिन्नविषयकप्रत्यक्षादिनिरूपिततदनुमितिसामग्रीप्रतिबंधकतायां तदभाववदनुमितिसामग्र्यभाववन्निवेशस्याधि
केन महागौरवात् तस्यैकरूप्यात्तत्र तत्र परामर्शांशे नाहार्यत्वनिवेशस्यैवोचितत्वात् ॥ एवमनाहार्यपरामर्शत्वेनानुमि
तिहेतुत्वे वह्न्यभाववद्बाष्पपर्वते इत्याकारकमानसशाब्दादौ वह्न्यादिप्रकारकपर्वतादिविशेष्यकानुमितिसामग्र्याः प्रतिबं
धकताकल्पने लाघवे ॥ ताद्रूप्यानुमितिसामग्रीकाले पर्वतत्वावच्छिन्नविशेष्यताकानाहार्यवह्न्यादिव्याप्यवत्तानिर्णय
स्यावश्यकत्वात् ॥ तदभाववद्व्याप्यवत्तानिर्णयप्रतिबंधकतयैवोपपत्तेः ॥ एवं वह्निव्याप्याभाववद्बाष्पपर्वते इत्याकारकमा
नसशाब्दबोधादौ तथाविधानुमितिसामग्रीप्रतिबंधकताकल्पने लाघवं बोध्यं बाधप्रतिबंधकतयैवोपपत्तेः ॥ अ

अ॰प॰ प्रामाण्यग्रहविशिष्टपरामर्शादनुमित्यनुदयात्। अप्रामाण्यज्ञानानास्कंदितपरामर्शत्वेन कारणतावाच्या॥ अप्रामाण्यं च
२१ धूमाभाववद्वृत्तिविशेष्यकत्वावच्छिन्नधूमप्रकारकत्वं॥ तद्वृत्तितत्प्रकारकत्वरूपप्रामाण्याभावस्यैवेति द्विविधं तयोश्चानुगता
21 नतिप्रसक्तरूपाभावात् भावाप्रत्येकमेवाभावानिवेश्यः। न चाप्रामाण्यग्रहविरोधित्वेन तदनुगमः। अप्रामाण्यव्याप्य
वत्ताज्ञानसाधारण्येन तस्यातिप्रसक्तत्वात्। अनुगताविरोधित्वनिर्वचनस्याप्यशक्यत्वात्॥ एवं च धूमाभाववद्विशेष्य
कत्वावच्छिन्नधूमप्रकारकत्वं॥ व्याप्यभाववद्विशेष्यकत्वावच्छिन्नव्याप्तिप्रकारकत्वव्याप्याभाववद्विशेष्यकत्वावच्छि
न्नव्याप्यत्वप्रकारकत्वरूपनानाविधाप्रामाण्यज्ञानानामप्यनुगमकासंभवात्तेषामभावकूटस्यैव निवेश्यः। न चाप्रा
माण्यग्रहकालेपि समवायसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्य परामर्शेपि सत्वात् अप्रामाण्यज्ञा
नाभावविशिष्टपरामर्शोस्तीत्यनुमित्यापत्तिरिति वाच्यं॥ सामानाधिकरण्यसंबंधेनैवाप्रामाण्यज्ञानाभावस्य परामर्
शेविशेषणत्वात्। अप्रामाण्यज्ञानकालेच परामर्शेनेन संबंधेन तदभाव इति कविता॥ तथा॥ अप्रामाण्यज्ञानकालेपि ह रा॰म॰ २१

दावच्छेदेनात्मन्यप्रामाण्यज्ञानाभावस्य सत्वेन परामर्शसामानाधिकरण्यसंबंधेनाप्रामाण्यज्ञानाभावस्यावश्यं सत्वात् अनु
मित्यापत्तेः। न स्वात्मसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकस्याप्रामाण्यानाधिकरण्येनाप्रतः स्वसमानाधिकर
णाप्रामाण्यग्रहकाले सामानाधिकरण्यसंबंधावच्छिन्नप्रामाण्यग्रहाभावस्य विशेषणतावैशिष्ट्याभिवेशनीयं परामर्शसमवायेन
स्याव्याप्यवृत्तित्वेन तु सामान्यप्रतियोगिताकाप्रामाण्यग्रहाभाववैशिष्ट्यविरहात्। एतेन स्वसामानाधिकरण्यसंबंधेनाप्रा
माण्यग्रहाभावविशिष्टपरामर्शस्य परामर्शविशिष्टप्रामाण्यग्रहाभावस्य वा हेतुत्वमिति विभिन्नमनोविरहोत्तरक्षणः सामा
नाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्याप्रामाण्यग्रहकालेऽप्यात्मनि सत्वेन परामर्शविशि
ष्टस्य तस्य हेतुत्वे प्रामाण्यग्रहकालेऽप्यनुमित्यापत्तेः। अथ पर्वतो वह्निव्याप्यधूमवानिति परामर्शानंतरं तज्ज्ञाने प्रमात्वे वि
तद्व्याप्यधूमवत्परामर्शविशिष्टतज्ज्ञानादेः धर्मितावच्छेदककाप्रामाण्यग्रहादशायां प्रामाण्यमिकपरामर्शादनुमितिस्तु दुरुपपत्तिः
तादृशासंबंधेन तस्याप्रामाण्यग्रहास्कंदितत्वात्। न च धूमपरामर्शत्वाद्यवच्छिन्नविशेष्यताकाप्रामाण्यग्रहाभावसंबंधेन का

अ॰प॰म॰ २२ प्रामाण्यग्रहाभाववत्त्वेन कारणतावच्छेदककोटौ निवेशात्तेन तादृशाप्रामाण्यग्रहदशायामनुमितेरनुत्पत्तिरिति वाच्यं। तन्ना
नमप्रमेति तन्नादिधर्मितावच्छेदककाप्रामाण्यग्रहकाले तत्राप्यपरामर्शादनुमित्यापत्तेः। परामर्शत्वावच्छिन्नविशेष्यताकाप्रा
माण्यज्ञानाभावविशिष्टपरामर्शत्वस्य तन्नत्वाविषयतन्नादिधर्मितावच्छेदककाप्रामाण्यग्रहाभावविशिष्टपरामर्श
त्वादिनापि हेतुता वाच्येति चेन्न। परामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहासंग्राहकतादृशानुगतरूपेणोक्ताभावो निवे
श्यते। तत्रैव पक्षित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहासंग्राह्यपक्षिसत्त्वे परामर्शसत्त्वेनानुमितिस्तत्रैव पक्षित्वाव
च्छिन्नस्याभावकूटस्य निवेशानापत्तेरनुपपत्तेः। तत्तत्पक्षित्वावच्छिन्नाभावस्तत्तत्पक्षिसमानकालीन
संयोगादिरूपोऽभावो वा निवेश्यत इत्यत्र विनिगमनाविरहादिति वाच्यं। अत्र न स्याधित्ति नमकाधिरहस्याकिंचित्क
रत्वात्। नानुपपत्तेष्वप्यपरामर्शे तदेकज्ञानमप्रमेति स्वप्रामाण्यज्ञाने न तः परामर्शः ततोऽनुमित्यनुपपत्तिः। अप्रामाण्य
ज्ञानाभावविशिष्टपरामर्शत्वस्य तादृशाप्रामाण्यज्ञानाभावस्यैव कारणतावच्छेदककोटौ निवेशादप्रमायाहि रुद्र॰ २२

तोपपरामर्शोत्पत्तिकालेऽनुमित्यापत्तिः प्राथमिकपरामर्शसत्त्वात्। अथैवं तादृशमतिप्रसंगवारणाय तादृशपरामर्शभे
दस्यैव कारणतावच्छेदककोटौ निवेश्यते न तु प्रामाण्यज्ञानास्कंदिताभावः। एवं च तत्कालीनवाच्यसंयोगात्यन्ताभावनि
वेशमादाय न विनिगमनाविरहः। सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकतादृशाभावकायेरूपान्नपरामर्शत्वे
दस्य लघुत्वादिति चेन्न। पक्षपरामर्शानंतरं तद्वृत्तानुमप्रमापदेनोत्पन्नकालिकस्यानुमितित्वतादृशाप्रामाण्यविषयितानीर
नेतरपरामर्शोत्पत्तिक्षणदानीमनुमित्यापत्तिवारणाय तादृशप्रामाण्यग्रहाभावनिवेशनस्यावश्यकत्वात्। नन्वपरामर्शव्य
क्तिभेदनिवेशे प्रागभावानुमितिसत्त्वे पक्षसंगात्। अनुमितेर्ज्ञानाप्रसिद्धिरूपप्रतिबन्धकसत्त्वादेव वह्नितो यत्परामर्शोत्प
त्तिकालेऽनुमित्यापत्तिवारणसंभवात्। तीयत्वलक्षणप्रामाण्यग्रहाभावनिवेशेनेति तु न वाच्यं। पक्षपदेतावच्छेदका
वच्छेदकवद्धेतुमत्त्वावगाहिप्रथमपरामर्शोत्पत्तिकालीनतादृशप्रमात्वे सामानाधिकरण्यमात्रावगाहिद्वाधम
शानन्तरं सामानाधिकरण्यमात्रावगाहिमिति हेत्वावच्छेदकाप्रामाण्यविषयितानुमितिर्ज्ञानानादृशहेतोर्बाधकत्वा

अ॰प॰म॰ सामानाधिकरण्यमात्रावगाहिसिद्धेश्चावच्छेदकावच्छेदेनानुमितिं प्रति प्रतिबंधकत्वात्तद्द्वितीयपरामर्शस्यापि का
२२ लेपदत्तावच्छेदकावच्छेदेन वन्ह्यनुमित्यापत्तिसंभवादिति चेत्। अत्र वन्ह्यात्वाद्वितीयपरामर्शस्याप्रामाण्यमानेतु
23 त्रैनेकत्वात्तत्परामर्शाभाववैशिष्ट्याप्रामाण्यज्ञानाभाववैशिष्ट्यपरामर्शस्य कारणता [redacted] ते। अथवा व्या
प्यमपरामर्शनिष्ठसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य कारणतावच्छेदक
त्वे द्वितीयपरामर्शे सामानाधिकरण्यसंबंधेनाप्रामाण्यज्ञानव्यक्तिसत्वेऽपि व्याप्यपरामर्शव्यक्तिनिष्ठसामानाधि
करण्यसंबंधावच्छिन्नप्रतियोगिताकतदभावः सुलभ एवेति न द्वितीयपरामर्शस्यानुमित्यनुत्पत्तिरिति। वस्तुतस्तु
सामानाधिकरण्यविशिष्टविशेष्यतासंबंधावच्छिन्नप्रतियोगिताकतदभावनिवेशान्न काप्यनुपपत्तिः। द्वि
तीयपरामर्शस्य तत्प्रामाण्यज्ञानविशेष्यत्वाद्विशेष्यतासंबंधावच्छिन्नप्रतियोगिताकतदभावस्य तत्र सौल
भ्यात्। चैत्रीयाप्रामाण्यग्रहविषयमैत्रीयपरामर्शादनुमित्युपपत्तये सामानाधिकरण्यस्य संबंधमध्ये निवे ए॰म॰
२२

शः।) विशेष्यताचाप्रामाण्यप्रकारतानिरूपितायास्तयोनेन प्रथमपरामर्शे प्रामाण्यावगाहिद्वितीयपरामर्शभ्रमे च ता
दिप्रकारकाप्रामाण्यग्रहस्य विशेष्यतापादितीयपरामर्शे सत्वेपि वनस्मात् तु मित्यनुदयापत्तिः। इष्यते च तन्नेष्य
क्रित्वादिधर्मितावच्छेदककोटौ विधा·प्रामाण्यज्ञानानां तादृशाप्रामाण्यज्ञाने सत्वेन उपदर्शितसंबंधावच्छिन्नप्रति
योगिताकाभावनिवेशे तु विरहानन्तत्र द्विक्रित्वेनाप्रामाण्यग्रहाभावानिवेशे पि· अप्रामाण्यत्वावच्छिन्नविशे
ष्यताकाप्रामाण्यतानद् शाकां अनुमितिरनुपपन्ने अप्रामाण्यप्रकारतानिवेशनीयाः इति केचन तु गमः सभवता
निवेशात्तन्न द्विक्रित्वानित उभयपाहत्रिधर्मत्वेनानुगमव्यप्रप्रामाण्यप्रकारतानिरूपित उभयपाहत्रिधर्मावच्छिन्नवि
शेष्यतासंबंधावच्छिन्नप्रतियोगिताकाभावनिवेशेनानुगमविरहात् उभयपाहत्रि त्वेवस्वप्रतियोगि त्र्हत्रि त्वत्वसा
मानाधिकरण्योभयसंबंधेन भेदविशिष्टं यत्रदन्यत्वं· उभयमहत्रिधर्मानां तादृशोभयसंबंधेन पत्तिः स्वत्वा भ्रम मे
दविशिष्टत्वाद्विरामः· मेदस्वव्यासमहत्रिधर्मानवच्छिन्नप्रतियोगिताकोमात्यः। ते उभयपाहत्रि धर्मारामपि

अ॰प॰ तादृशोभयसंबंधेन सार्वत्रिकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदविशिष्टत्वेपि न क्षतिः। तादृशधर्मनिष्ठावि-
२४ शेष्यतावच्छेदकतावन्निरवच्छिन्नात्यात्। अतः प्रमेयवत्त्वादिना तत्रावच्छिन्नाविधर्मितावच्छेदककाप्रामाण्यग्रह-
विरहः। धूममत्परामर्शत्वेन तद्धूमपरामर्शे मधूमवत्परामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहाणां च तादृश-
धर्मावच्छिन्नविशेष्यतासंबंधावच्छिन्नप्रतियोगिताकाभावातः दृष्टा एव निवेश्याः॥ अनन्ततादृशधर्माणामुभयवृत्ति-
त्वेपि न क्षतिः। केचित्तु अप्रामाण्यग्रहाभावस्य परामर्शकारणतायां अवच्छेदकत्वमतेः प्रामाण्यग्रहाभावविशि-
शिष्टत्वे सति परामर्शत्वं परामर्शत्वे सति अप्रामाण्यग्रहाभावविशिष्टत्वं वा कारणतावच्छेदकमिति विनिगमना-
विरहेण त्वां अन्यथासिद्धभावादीनामपि परामर्शकारणतावच्छेदकत्वप्रसंगात्। अप्रामाण्यग्रहाभावस्या-
ऽनुमितिहेतुत्वे तु त्वेरं तान्धूमाभाववन्निधमत्वप्रकारकेर सामाकारकाप्रामाण्यग्रहदशायामालोकपरामर्शादनुमि-
तिर्न स्यात् अतस्तन्निवेशः। अप्रामाण्यग्रहस्य सत्त्वात्। न च धूमपरामर्शजन्यानुमितित्वावच्छिन्नं प्रत्येव धूमाभाववत्व रा॰प॰
कार्यकारणभावबोधकत्वमवच्छेदकगौरवं चेति प्राग्धाराप्रामाण्यज्ञानाभावस्य स्यात् तस्मादनुमितिहेतुः २४

नुमितिसा
प्राप्रा

हि शेष्यकतावच्छिन्नधूमप्रकारकत्व प्रामाण्यग्रहाभावस्य हेतुतानायं दोषः इति वाच्यं । एवमप्युपदर्शितप्रामा
ण्यग्रहदशायां धूमालोकोभयकसमूहालंबनपरामर्शाद् अनुमितिर्न स्यात् । समूहालंबनपरामर्शजन्यानुमि
तौ विधूमपरामर्शजन्यत्वप्रयोजकप्रामाण्यग्रहप्रतिबध्यतावच्छेदकाक्रान्तत्वात् । धूमपरामर्शमात्रजन्यानु
मितित्वस्य प्रतिबध्यतावच्छेदकत्वे तु तत्स्यपुरुषाकालोकादिपरामर्शप्रामाण्यग्रहस्यापि वह्निलिंगकपरामर्श
जन्यानुमितित्वावच्छिन्नं प्रत्येव प्रतिबंधकतायाः वक्तव्यतया उभयलिंगकपरामर्शजन्यानुमितौ कस्यचिद् प्रा
माण्यग्रहस्य प्रतिमितित्वावच्छिन्नं प्रत्येव प्रतिबंधकतायाः वक्तव्यतया उभयलिंगकपरामर्शजन्यानुमितौ वस्यचिद्
प्रामाण्यग्रहस्य प्रतिबंधकत्वेऽपि उभयविधाप्रामाण्यग्रहदशायामपि उभयलिंगकपरामर्शाद् अनुमित्यापत्ते
रिति चेन्न । तद्दप्रामाण्यग्रहविशिष्टस्वंवत्वाव्यवहितोत्तरत्वोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबंधेन । स
मूहालंबनपरामर्शजन्याप्रामाण्यग्रहविशिष्टेतरानुमितित्वस्य तादृशाप्रामाण्यग्रहप्रतिबध्यतावच्छेदकाक्रां
प्रामाण्यग्रहविशिष्टजन्यानुमितित्वावच्छिन्नं प्रति तदप्रामाण्यग्रहाभावत्वेन हेतुता· अ२

श्र·प·
२५
25

तता। नचैवं पक्षधर्मताज्ञानलिंगकपरामर्शस्य ज्ञानाप्रामाण्यग्रहसत्वे न विशिष्टानुमित्यापत्तिः। तस्य तद्विशि-
ष्टान्यानुमितिं प्रत्येव प्रतिबंधकत्वादिति वाच्यं। धूमादिमत्परामर्शस्य तत्पाठोक्षाप्रामाण्यग्रहाभाव-
सहकारेणैव फलजनकत्वोपगमात्। केवलपक्षधर्मपरामर्शस्यानुमितिस्वरूपापादकत्वात्। अथ पक्षसामान्यसामग्री-
विशेषसामग्र्योरेव परस्परसहकारित्वाद्प्रामाण्यग्रहाभावपरामर्शयोश्चान्यथात्वे न परस्परसहकारिता-
संभवः। न च पाहि। तादृशाप्रामाण्यग्रहकालीनपरामर्शजन्यानुमितेर्धर्मपरामर्शजन्यतावच्छेदकाक्रांततया।
प्रामाण्यग्रहाभावजन्यतावच्छेदकस्य तत्राधारतापाभावे तत्र स्वपरामर्शजन्यतावच्छेदकाव्यापकतयाताप्रा-
माण्यग्रहाभावस्य परामर्शेन फलजनने तत्सामान्यसामग्रीत्वसंभवः। व्यापकधर्मावच्छिन्नसामग्र्याएव सामान्यसा-
मग्रीपदार्थत्वात्। एवं तादृशाप्रामाण्यग्रहाभावविशिष्टलोकादिमात्रलिंगकपरामर्शजन्यानुमितेरपि तादृ-
शाप्रामाण्यग्रहाभावविशिष्टत्वरूपतादृशाप्रामाण्यग्रहाभावजन्यतावच्छेदकाक्रांततया धर्मपरामर्शजन्यता- श्र·प·
२५

वच्छेदकस्य तन्त्राधारत्वाभावेन तस्याग्रामारोपग्रहाभावरूपजन्यतावच्छेदकाक्रान्तत्वाद्यमपरामृष्टव्यापकतया

परामर्शेन फलजननेनाग्रामारोपग्रहाभावस्य विशेषसामग्रीत्वसंभवे व्याप्यधर्मावच्छिन्नसामान्यारोपत्वविशेषसाम

ग्रीत्वादित्येवं च । कार्यतावच्छेदकसामानाधिकरण्येन सहकारितायाः तन्त्रत्वं । ननु सामान्यविशेषभावोपि नि

नानुपपत्तिः अस्तु वाः ग्रामारोपग्रहाभावविशिष्टधूमलिङ्गकानुमितित्वमेवाग्रामारोपग्रहाभावजन्यताव

च्छेदकं । न चावविशेषसामग्रीत्वमेव तत्स्वस्य तेनानुपपत्तिः अस्थैर्यादाहार्यारोपग्रहाभावरूपसहकारितावि

नापि धूमलिङ्गकानुमितित्वरूपं स्वीयकार्यतावच्छेदकावच्छिन्ने तन्नपत्तीति चेत् आपपग्रामारोपग्रहाभावरूप

सहकारितामन्वंतर्भाव्य समूहालंबनस्यलीपफलावशेषे न धूमपरामर्शघटितसामग्र्याः फलव्याप्यत्वमनुपप

त्तेर्वे चो कायत्तिः संभवति आपादकीभूतसामग्रीसत्त्वात् । तदेव तन्नासमूहालंबनस्य लेआलोकपरामर्शघट

तसामग्रीतरवफलोपपत्तेर्यथैव शब्दे वताहृशफलस्य ज्ञानां ...विशिष्टत्वतत्वे धूमपरामर्शविशिष्टसमूप

कार्यतावच्छेदकावच्छिन्नस्य समूहालंबनात्मकपरामर्शेनिजननात्परामर्शोपितेविनानकथं ४

अ॰ प॰ धूमलिंगकत्वस्याप्युपपत्तेः। धूमपरामर्शघटितसामान्या व्याप्यत्वेनरस्वीकारस्यापि: प्रयोजनकतानापत्तिवसादृशसामासा
२६ म्रा व्याप्यत्वेनरेनरतुरोधमात्रेणाकल्प्यत्वेनतदालोकपरामर्शनदीयाग्रामाराप्यमहाभावादकोप्यवश्यंशंनमोव्याद्यमि
26 नानुपपत्तिरिमाऊः नत्रा व्याग्रामाराप्यग्रहाभाववस्यस्वानंअेराहेतेलाप्रगमेय कधूमादिपरामर्शनि एत्तद्यक्तित्वादिधर्मि
नावच्छेदककाग्रामाराप्यग्रहदर्शनाधूमादिपरामर्शोतरादनुमित्यनुपपत्तेः। नचतत्रतद्धूमपरामर्शादितनानुमि
तोतत्रव्यक्तिधर्मिकाग्रामाराप्यग्रहाभावस्यहेतुत्वात्रानुपपत्तिरितिवाच्यं। अग्रामाराप्यग्रहवशायाहशव्यक्तौतुमि
तिर्नजनितातव्यक्तिजन्यानुमितेरेवाप्रसिद्ध्याप्रतिबध्यतावच्छेदकाप्रसिद्धेः। नचयादृशाग्रामाराप्यग्रहसत्त्वेइतरकार
णसत्त्वेनानुमितिस्तादृशाग्रामाराप्यग्रहेव्यक्तौनतत्रव्यक्तित्वेनप्रतिबंधकत्वोपगमान्नानुपपत्तिः। एतत्तद्धूमत्वमधूम
परामर्शादितीयदूरोनत्राग्रामाराप्यज्ञानेनतेधूमपरामर्शोतरंतत्रचाद्वितीयपरामर्शाभावविशिष्टायाएवतत्राग्रामा
राप्यग्रहव्यक्तेः। प्रतिबंधकत्वमुपगंतव्यात्रतोनाद्वितीयपरामर्शोत्तरानुमित्यनुपपत्तिरितिवाच्यं। एवमप्यनंतप्रतिबध्य ए म॰
२६

परामर्शस्यापि तथात्वमक्षतमेवेति तत्रापि तेन संबंधेनानुमित्युत्पत्त्या व्यभिचारः न वाप्रामाण्यग्रहविशिष्टान्यत्वस्य कार्यतावच्छेदकत्वान्न व्यभि
चार इति वाच्यं अप्रामाण्यग्रहविशिष्टान्यत्वं कार्यतावच्छेदकत्वेऽक्षम ५

प्रतिबंधकाभावकल्पनायां गौरवमास्वस्यात्। अप्रामाण्यग्रहाभावस्यावच्छेदकत्वमतेनानुगमस्य दर्शितत्वात्तानुपपत्तिः।
परंतु जनकतासंबंधेनानुमितेस्तस्मान्नाधिकरणविशिष्टाप्रामाण्यग्रहकारणमात्रिरूपिततद्विशेष्यतेविशेषसंबंधाव
च्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य हेतुत्वोपगमात्रे कविधपरामर्शव्यक्तिधर्मिकाप्रामाण्यग्रहदशायां परामर्शा
न्तरादनुमित्युत्पत्तिप्रसंगः। जनकीभूतपरामर्शेऽप्रामाण्यग्रहाभावस्याऽसत्त्वात्। अथैतन्मतेऽधर्मपरामर्शत्वादिनै
वानुमितिजनकत्वात् अप्रामाण्यग्रहविषयीभूतपरामर्शेतरधर्मिकाप्रामाण्यग्रहेऽपरक्षमपरामर्शजन्यानुमिते
रसंग्रहापत्तिः अतो विशेष्यतासंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टधर्मपरामर्शविशिष्टत्व
स्यैव कार्यतावच्छेदकत्वमुपेयं तथा चैतादृशस्थले व्यभिचारो दुर्वार एव० तादृशानुमितेरपि तथाविधकार्यतावच्छेदका
नत्वात्। न च वोपधायकतासंबंधस्यैव कार्यतावच्छेदकत्वोपगमेनाप्रामाण्यग्रहविषयीभूतपरामर्शस्य बुधर्मपरामर्शत्वा
दिरूपेण फलानुपधायकत्वपानव्यभिचार इति वाच्यं ० उपधायकत्वं हि फलाव्यवहितपूर्ववर्तित्वे सति स्वरूपयोग्यता व

अ॰प॰म॰ छेदकधर्मवत्त्वं न स्वपक्षघटकपरामर्शद्वितीयकरणे नञ्ज्ञाप्यमात्रव्याप्यावगाहिपरामर्शानन्तरं न दहनेनानुमितिरित्यस्यालीप
२७ परामर्शसाधारणमेवेति व्यभिचारस्य दुर्वारत्वात् । तत्पक्षपरामर्शोपि तेन संबंधेनानुमित्युत्पत्तेः तत्साध्यमात्रव्याप्यावगाहा
भावस्यानुमित्यव्यवहितपूर्वत्वे हेतोः सत्त्वात् । तत्र च तत्तद्व्यक्तित्वावच्छिन्नं तत्तज्जनकत्वमेवोपधायकत्वं । तादृशजनक
तानां च विशेषणानां वच्छिन्नजनकतात्वेनाकिंचित्कर्मावच्छिन्नावच्छेदकतान्यजनकतात्वेन वा अनुगमकत्वेनेत्यामतु
गतत्वरूपेण संबंधत्वमुपपन्नं उपदर्शितस्थले द्वितीयपरामर्शव्यक्तेः तद्व्यक्तित्वेन हेतुत्वे पूर्वोपपन्नो यत्र पक्षपराम
र्शव्यक्तेः तद्व्यक्तित्वेन हेतुत्वेन कल्प्यते अनेन तत्तादृशजनकतासंबंधेनानुमितित्वावच्छिन्ने व्यभि
चार इति वाच्यं । परामर्शस्य तद्व्यक्तित्वेन हेतुत्वमप्रामाणिकमिति तेनानुगतदृशजनकतायाः कार्यतावच्छेदकत्वा
सत्त्वे संभवतीति न च तद्व्यक्तित्वावच्छिन्नस्य सामान्यसामग्रीनियम्यस्थले अन्यथासिद्धत्वापत्तिसंभवे तत्तद्व्यक्ति
त्वेन हेतुत्वमावश्यकमिति वाच्यं । एवमपि पक्षवृत्तिव्याप्यघटव्याप्यामपविषयकसमूहालंबनानंतरमपा रम॰ २८

विधसमूहालंबनात्मकप्रथमपरामर्शे वह्निव्याप्यवत्तांशे स्वांशे च घटव्याप्यवत्तांशे चाप्रामाण्यग्रहाद्द्वितीयप
रामर्शोत्पत्तौ तस्य स्ववह्निविधेयकानुमितिः तत्र व्यभिचारस्फुर्तिर त्वात्। तथाहि। प्रथमानुमितिव्यक्तौ प्रथमद्वितीयप
रामर्शस्य न तद्व्यक्तित्वेन हेतुता न तद्व्यक्त्यनुमिति प्रति वह्निव्याप्यवत्ताज्ञानीयाप्रामाण्यग्रहाभाव हेतुतायां व्यभिचार
ः प्रथमपरामर्शोपधायकतासंबंधेनानुमितिसमानाधिकरणत्वात् प्रामाण्यग्रहाभावासत्त्वात्तादृशद्वितीयप
रामर्शस्य तद्व्यक्तित्वेन हेतुता तदा घटव्याप्यवत्ताज्ञानीयाप्रामाण्यग्रहाभाव हेतुतायां व्यभिचारस्तिवेत् न। नेवं प्रथमव
ह्नितद्व्यक्तिरूपलावच्छेदेनाप्रामाण्यग्रहाभावाधिकरणताविशिष्टजनकतापादककार्यतावच्छेदकप्रत्यासत्तित्वाम
नकुत्रापि व्यभिचारः। अनुमितिसविशेषवह्नितद्व्यक्तित्वरूपत्वावच्छेदे प्रामाण्यग्रहे विषयीभूत यत्र प्रथमपरामर्शो जनकतासंबंधे
पि तत्र व्यवहिततद्व्यक्तिरूपलावच्छिन्नायाश्च प्रामाण्यग्रहाभावाधिकरणतायाश्च सत्त्वात्तादृशनीयत्वरूपवत्प्रथमपराम
र्शे प्रामाण्यग्रहोत्पत्तौ तत्र रूपलावच्छेदेन ज्ञानप्रामाण्यग्रहाभावाधिकरणतायाः सत्त्वाद्व्यभिचाराहेतुकत्वात्

अ.प. द्वेष्यतेः स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वमधिकरणतांशे विशेषणमिति । अत्र यज्जनकतासंबंधेनानुमितावप्रामाण्य
२८ ग्रहाभावस्य हेतुत्वेः प्रामाण्यग्रहाभावाधिकरणीभूतेऽनुमित्यजनके घटज्ञानादावपि तादृशसंबंधेनानुमित्याप
त्तिः अप्रामाण्यग्रहाभावरूपकारणसत्त्वादित्यत आह तत्र च धूमपरामर्शनिष्ठजनकतासंबंधेनानुमितिं प्रतितादात्म्यपु
त्वासत्त्वाद्धूमपरामर्शत्वादिनापि हेतुत्वोपगमात् न चैवं परामर्शकारणताद्रूपकत्वेनागौरवमिति वाच्यं । अप्रामा
ण्यग्रहाभावविशिष्टपरामर्शत्वेन हेतुतामतेः प्रामाण्यग्रहाभावानामनन्ततया तद्विशिष्टपरामर्शत्वादीनां विशेषणवि
शेष्यभावे विनिगमनाविरहेणानन्तकारणताधिककल्पनाप्रसंगात् तद्रूपेऽप्यलाघवस्यानपायात् । वस्तुत
स्तु तादात्म्यसंबंधेनैव परामर्शस्य हेतुत्वं कल्प्यते न तु संबंधांतरेणापीति न परामर्शकारणताद्रूपकत्वं । न
च संबंधांतरेण परामर्शस्य जनकत्वानाकल्पने जनकतासंबंधेनानुमितिं प्रतितादात्म्यसंबंधेन परामर्शहे
तुत्वमेव न संभवति स्वस्य स्वनिरूपितकार्यतावच्छेदकसंबंधेनापि आत्माश्रयप्रसंगात् तादात्म्येन जनकतापा राम. २८

ष्याप्रसिद्धेरिति वाच्यं॥ विशेषणज्ञानादिमुद्रया परामर्शस्यानुमितिं प्रति हेतुतासत्वात् तादृशहेतुताया एव धूमादि
परामर्शहेतित्वे हेतुतात्वेन तादात्म्यसंबंधावच्छिन्नपरामर्शनिष्ठजनकतानिरूपितजन्यतावच्छेदकप्रत्यासत्तित्वो
पगमात्॥ अप्राप्तापत्यग्रहाभावजन्यतावच्छेदकप्रत्यासत्तित्वोपगमाच्च॥ अपि जनकतासंबंधेनानुमितिं प्रति अ
प्रामाण्यग्रहाभावहेतुत्वे प्रमाण्यग्रहाभावघसत्वेपि सिध्याभावादिवलात्समवायसंबंधेनात्मन्यनुमित्यापत्ति
रुक्तरीरेवेति वेन्न॥ तादृनरसंबंधेन कार्योत्पादसामग्र्यधिकरणीभूततत्क्षणावृत्तित्वविशिष्टापायाएव तत्संबंधेन का
र्योत्पादकसामग्र्यात्वसंबंधेन कार्योत्पत्ति व्याप्यत्वाज्जनकतो संबंधेनानुमित्युत्पादकसामग्रीसत्व कालीनसि
ध्यभावादिघटितसामग्रीवलात्समवायसंबंधेनानुमित्यापत्त्यभावादिति॥ अत्रेदं चिन्त्यते॥ जनकतासंबंधेना
नुमितिं प्रति अप्रामाण्यग्रहाभावादीनां हेतुत्वे पुरुषांतरस्याप्रामाण्यग्रहानास्कंदितपरामर्शदशायां अप्रा
माण्यग्रहानास्कंदितपरामर्शस्य न्यायप्यात्मनि सिध्याभावादिघटितसामग्रीवलात्समवायसंबंधेनानुमित्याप

अ.प. २८ त्तिः॰जनकतासंबंधेनानुमित्यापादकसामग्र्याः तद्रूपोत्तरं एवं तदानीं सत्वात् अन्यत्र तत्तद्रूपीयपरामर्शवृत्तिजनकतासंबं
धेन तत्तद्रूपीयानुमितित्वप्रतिताकाभावस्य संबंधेन तत्तद्रूपीयपरामर्शत्वेन समवायसंबंधेन तत्तद्रूपीयानुमितित्वप्रतिता
दान्येन तत्तदन्यत्वेनापि हेतुतावाच्या । एवं च सिद्ध्यभावतत्तद्रूपादिघटितायाः समवायसंबंधेनानुमितित्वविशिष्ट
त्पादकसामग्र्याः तत्तद्रूपीयपरामर्शवृत्तिजनकतासंबंधेनानुमित्युत्पादकसामग्रीसहकृततापादेव समवायेन
लोपधायकत्वमित्युपगमस्य तादृशापत्तिवारणाय संभवादिति तद्रूपमेदेन परामर्शहेतुतावाच्यत्वे तत्तद्रूपीयका
नुमितौ अन्येन तत्तन्नामात्मनो नत्वेछ्यक्षितत्वेन हेतुताकल्पनाधिक्यं चेत् तत्पक्षमात्रापत्तिहावाद्विशिष्टपरामर्शत्वेन हे
तुताकल्पनमेव साधीयः ॥ आलोकादिलिंगकानुमितौ धूमपरामर्शस्यापि वारणाय तत्तल्लिंगकपरा
मर्शव्यवहितोत्तरत्वोत्पत्तिकत्वेन तत्तल्लिंगकपरामर्शजन्यतावच्छेदककोटौ निवेशनीयः अन्यथा हेतुतावच्छेदका
घटितसाध्याभाववद्वृत्तित्वरूपव्याप्यवगाहिपरामर्शस्यानुमितिहेतुत्वे धूमालोकादिलिंगकनिखिलपराम स्मः २८

र्शो न वह्न्यभाववद्वृत्तित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताशालिनिर्णयत्वेनानुगम
सेऽमवा व्यभिचाराभावे नाव्यवहितोत्तरत्वनिवेशने व्यर्थमेवेति चेन्न। एकसंबंधावच्छिन्नसाध्याभाववद्वृत्तित्वरूप
व्याप्यत्वावगाहिनः संबंधांतरेण हेतुप्रकारताशालिनिर्णयादनुमित्यापत्तिवारणाय विशिष्य हेतुतावच्छेदकसं
बंधनिवेशः साध्याभाववद्संयुक्तत्वावच्छिन्नसंयोगसंबंधावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्य
ताशालिनिर्णयत्वेन हेतुता वाच्या। एवं च साध्याभाववद्समवेतत्वादिरूपव्याप्यत्वावगाहिपरामर्शजन्यानुमि
तौ साध्याभाववद्संयुक्तत्वादिरूपव्याप्यत्वावगाहिपरामर्शस्य व्यभिचारवारवारणाय तादृशपरामर्शाव्यवहितो
त्तरत्वं तादृशपरामर्शजन्यतावच्छेदककोटाववश्यं निवेश्यं। अव्यवहितोत्तरत्वं चाव्यवहितत्वे सति उत्तरत्वं। प्र
मपरामर्शाव्यवहितपूर्वोत्पन्नालोकादिलिंगकानुमितौ व्यभिचारवारणाय विशेष्यदलं। नन्वेवं [illegible]
साधिकरणत्वे परामर्शादि[illegible]तीयक्षणोत्पन्नानुमित्यसंग्रहात्। किंतु स्वाधिकरणसमयध्वंसवत्त्वं निखिलाको

नुमित्यसंग्रहापत्तेः समयांतरं निवेशपत्तस्साधारण्ये वह्निशालस्थापि माजपरामर्शश्चतुर्थक्षणेनोत्पन्ना ४

स्वरूपसम्बन्धाधारण्याभावेन न स्वरूपेणानुमितिसमेतत्वघटनेः। नापि त्वाधिकं १

अ॰प॰ नामेव हेतुत्वानो विशिष्टविनष्टधूमपरामर्शोत्तरं तत्पाम्यलिंगकानुमितावेव व्यभिचारस्तत्र वह्निव्यानविशेषः। तदूर्ध्वस्य तत्ना

६४ श्याधिकरणसमयानुत्पन्नत्वे सत्ताशाधिकरणसमयध्वंसानधिकरणत्वमिति यावत्। न तु स्वाधिकरणसमयध्वंसाधि

करणसमयानुत्पन्नत्वं तं रणसमयोत्तरसमयोत्तरोयः समयस्तद्वृत्तित्वं। अपेक्षानुव्यापकपरामर्शोत्पत्त्युत्तरं

29 तु तत्र लिंगकानुमितो व्यभिचारश्च संगाह्य। अथ विशिष्टविनष्टधूमपरामर्शोत्पत्तिः। ननु न्यायविधमपराम

र्शोत्पत्तिनाव्यवधानेन तत्र मते विशेषणे तत्रान्यलिंगकानुमितेरव्यभिचारो न तु वा। नन्वेवं धूमपरामर्शाव्यवहितत

30 त्वस्मिन्नेव धूमपरामर्शोत्तरोयः क्षणस्तद्वृत्तित्वविशेषणान्मनुमानः। अत्र न तत्कार्यकारणभावप्रसंगश्चद्विवे

तद्वे तत्वास्वाव्यवहितत्वेस्ति स्याद्वितयोपश्रणस्तद्वृत्तित्वसंबंधेन धूमपरामर्शवत्त्वमेव धूमपरामर्शजन्यतावच्छे

दकं। तादृशानुमितिश्चैतादृशसंबंधेन धूमपरामर्शविशिष्टा। स्वपरं नाचिरातीत धूमपरामर्शोपादानेन तद्

व्यवहितत्वस्यभावविमर्शपादानेवैसंपारनेत्वात्। न च स्वपदेनानव्याक्तिविवक्षेत्यत्र न तु गमायस्यास्वपदे अनु॰ २०

न तु नरत्वम्‌ तादृशहेतोः स्वत्वे न स्वपदेनैकव्याक्तिमादाय संबंधघटकेदंतस्य पक्षस्यानुगमोऽनुगमकत्वात्‌ १

गमनेनतादात्म्यसंबंधेनपरामर्शवित्वमक्षतमेवेतिवाच्यं २

नधूमपरामर्शसामान्यमेवविवक्षणीयं एवंचधूमपरामर्शव्यवहितोत्तरक्षणोत्पत्तिकत्वेस्वसंबंधनपानत्व
व्यक्तिद्वयमादायपरत्वद्वयसंबंधाघटकतयासामान्यरूपेणानिवेशोपिएकव्यक्तितरव्यवधानस्यव्यक्त्यंतरे
तरत्वस्यचव्यक्त्यंतरसंबंधाघटकतयासामान्यरूपेणानिवेशोपिएकव्यक्तिनिरूपितपरत्वद्वयघटितत्वविशिष्टस्या
निवेशात् । अथैवंधूमपरामर्शादिरूपपरत्वपदार्थनिवेशोपिनिरर्थकः । तदनिवेशेपिअन्यदापाद्यव्यवधाना
दिनान्यसंबंधस्याप्रसंगाभिरहादितिचेन्ननिवेशपक्षेएवसंबंधमध्येस्वपदार्थः । स्वपदेरूपकथनेनतुअन्यनि
रूपितसंबंधारेनान्यसंबंधनेतिपरिचायकेवेति । अथयत्तनाशाधिकरणसमयध्वंसानधिकरणत्वरूपाव्य
वधानेपिस्वपदार्थानिवेशनेननाशाधिकरणसमयध्वंसानधिकरणत्वतदतिरिक्तपर्यवसन्नंतथाचाप्रसिद्धिः ।
सर्वेषामेवक्षणानांकिंचिन्नाशाधिकरणसमयध्वंसवत्वेनतदनधिकरणत्वाप्रसिद्धेः । एतदंतर्गतेपिचेमस्व
त्वनिवेशेपिनिस्तारः । धूमपरामर्शत्वावच्छिन्नस्यस्वपदार्थत्वेऽनादौसंसारेसर्वेषामेवक्षणानांधूमपरामर्शव

अ॰पु॰ रामर्शीनाशाधिकरणसमयवृत्तिनाशाधिकरणतयातदनधिकरणत्वाप्रसिद्ध्यानदोषस्तदवस्थ्याताः । तत्तद्व्यक्ति
३१ त्वावच्छिन्नस्य च स्वपदार्थत्वेनानुगमप्रसंगात् । नवतत्तद्व्यक्तिनाशाधिकरणसमयवृत्तिनाशानधिकरणत्वानामेव
नाशाधिकरणसमयनाशवत्त्वप्रतियोगिकभेदत्वेन निवेशात्तेनानुगमोऽनवात्रसिद्धिरितिवाच्यम् एवं सति
31 पंचमादिक्षणमेदद्रव्यस्यापि नाशत्तरूपकालत्वेन नाशभेद ... धिकरणीभूतनचैतत्तु यादिक्षणे सत्ता
नुमितेर्व्यभिचारश्च संगृहीतनिवेशनैव । नाशाधिकरणसमयध्वंसानधिकरणत्वमित्यस्य स्वाधिकरणसमयध्वं
सवत्त्वसंबंधावच्छिन्ननाशत्वनिष्ठप्रतियोगितानिरूपकाभावत्वमित्यर्थः । नाशाभावत्वेन । तत्तद्व्यक्तिनाशाभा
वानामेवनिवेशात्तदप्रसिद्धिः । तत्तद्व्यक्तिनाशाभावत्वेन निवेशात्तु नानुगमः । तत्तद्व्यक्तेरनिवेशे पि वा
च्यत्तरनाशाभावस्य च तत्तरसंबंधत्वाभावाप्रतियोगिकत्वेनाप्रसिद्धिः । तत्तद्व्यक्तिनाशस्य वह्नित्वाद्यवच्छिन्नाभाव
दिकमादाय प्रसिद्धसमवायेन सकलनादिव्यक्तिनिष्ठतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावत्वेनाशाभा राम॰
३१

त्वनिवेशनमावश्यकमिति स्पन्दत्वं गमनत्वादिवृत्त्यखण्डोपाधिरेवेति केचित्। किंचिदूर्ध्वावच्छिन्नप्रतियोगितावच्छेद
कतानाक्रान्तत्वेन नाशनिष्ठप्रतियोगितापादिविशेषणतापन्नया उत्क्षेपत्वाद्यवच्छिन्नप्रतियोगिताकाकारतासंभ
वात्। उत्क्षेपत्वादेर्जातिविशेषविषयत्वात्तत्पूर्वकस्य तादृशविषयत्वात्कादिनैव प्रतियोगितावच्छेदकतया तादृ
शप्रतियोगितानो किंचिदूर्ध्वावच्छिन्नावच्छेदकतानाक्रान्तत्वलविरहात्। तादृशोत्पन्ननाशनिष्ठत्वेन ध्वंसक्रियात्वाव
च्छिन्नप्रतियोगिते च तन्नध्वंसक्रियात्वांशस्वरूपगमकत्वे वा वृथैव कल्पनेति। एवमन्यत्रापि द्वित्वाद्यवच्छिन्नाभाववत्
रतां क्षोद्यं। धूमादिपरामर्शसमसमयविनष्टत्वेत्तत्वावस्यापि स्थूलकालोपाधीनामपि उपदर्शिताव्याव
हितोत्तरक्षणत्वान्न्यानतत्तुस्पन्दे धूमपरामर्शिताकालीनाव्यलिताकर्मत्वमिति नोपाधिभावारवारतापस्तोति
स्पन्दत्वं स्वजन्यविभागप्रागभावावच्छिन्नकर्मत्वं स्वपूर्ववृत्तिपदार्थविशिष्टत्वं वा। तत्र स्व
पदं न तु ध्वंसिपरं कर्मसामान्यस्य स्वपदार्थत्वेऽप्याधेयत्वन्यकर्मजन्यविभागप्रागभावविशिष्टस्य कर्मताः

प्रतियोगिजनकत्वसंबंधेन विभागप्रागभावविशिष्टकर्मत्वेन वक्षणत्वं स्य ३
परिचायकत्वात् २

प्र.प. रूणावच्छेदस्यापि तथात्वम् अपरामर्शदशायां कालीनाम्यलिंगकानुमितेर्व्यभिचारप्रसंगात् तादृश्येव कर्मान्तरं हि तत्र चिरविनष्ट
१२ पदार्थानामपि तथाविधयावत्पदार्थान्तर्गतत्वात् तादृशयावत्पदार्थविशिष्टाप्रसिद्धेः एवं चाननुगमप्रसंग इति चेन्न स्व
पदार्थस्य संबंधमध्ये निवेशः अन्यप्रतियोगिजनकत्वस्यान्यसंबंधत्वाभावात् तादृशस्वपदार्थकर्मजन्यविभागप्रागभावमा प्राग २
दाय न दोषः। अथवा स्वप्रतियोगिमत्त्वसंबंधावच्छिन्नप्रतियोगिताकनाशाभावविशिष्टत्वे पदार्थान्तरसाधारणा
रूणात्वे। न चैवं द्वितीयरूणावच्छेदेन कर्मादीनां तादृशपदार्थस्याधिकरणावच्छेदेन स्ववृत्तित्वया स्वप्रतियोगिमत्त्वसं
बंधेन तन्नाशविशिष्टस्य द्वितीयक्षणे सत्वेन तदभावासत्वात्। न च द्वितीयक्षणे नाशस्य सत्वेपि संबंधघटकप्रतियो
गिनोऽभावात् तद्वृत्तित्वसंबंधेन नाशाभाववत्वम् क्षणेऽस्त्येवेति वाच्यं प्रतियोगित्वोपलक्षणविधये च संबंधघटकता
त् तदसत्वेपि क्षतिविरहात्। अथैवमपि परामर्शपूर्वकालोत्पन्नतत्क्षणमपविनष्टकर्मात्र परामर्शप्राक्का
लीनानुमितेर्व्यभिचारो दुर्वार एव। तत्रापि स्वाव्यवहितोत्तरत्वतादृशप्रागभावविशिष्टनाशाभावविशिष्टत्वाकर्मत्व राम.
१२

नाशाभावविशिष्टत्वे प्रतियोगिकस्य विद्धिनाश इति नियमेन द्वितीयक्षणेऽवच्छेदकस्य चित्पदार्थस्य नाशात् तादृश ५
त्वं.

न्यत्रिकत्वमेव स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वमित्यस्यार्थः। तच्च तादृशानुमितावरूपत्वमेव तत्तु न्यूनाधिकरणीभूतोपदर्शि-
तकर्मिणतत्परामर्शाव्यवहितोत्तरत्वात्। अत्राप्युक्तरूपेणावच्छेदेन तादृशप्रागभावावच्छिन्नस्यात्रेतिचेन्न। तादृशप्रागभावादि-
वैशिष्ट्यावच्छेदेन स्वाधिकरणसमयध्वंसवत्त्वरूपस्योत्तरत्वस्य निवेशनीयतयोपदर्शितकर्मिणि स्वपरामर्शध्वंसे
व तादृशप्रागभावादिवैशिष्ट्यसत्त्वेनानन्तरावच्छेदेन तादृशपरामर्शाधिकरणसमयध्वंसे स्वाधिकरणत्वेनास्येवेत्यदोषा-
त्। न चैवं परामर्शानन्तरं तादृशमानसस्यैव कर्मिणः तादृशप्रागभावादिवैशिष्ट्यावच्छेदेन तत्परामर्शाधिकरणसम-
यध्वंसवत्त्वानुत्पत्तेः तस्य च तत्परामर्शनाशाधिकरणत्वं तदीयक्षणादिध्वंसाधिकरणत्वेनाव्यवहितत्वाभावात्तादृश-
प्रागभावादिवैशिष्ट्यावच्छेदेन तत्परामर्शाधिकरणध्वंसवतोऽव्यवहितत्वाप्रयुक्तकर्मिण एवाप्रसिद्धिरिति वाच्यं तत्-
नाशाधिकरणसमयध्वंसानधिकरणत्वमित्यस्य स्वकालस्वाधिकरणसमयध्वंसवत्त्वसंबन्धावच्छिन्नप्रतियोगिताक-
त्वनाशाभावविशिष्टत्वकतया परामर्शोत्तरोत्पन्नस्य कर्मिणः परामर्शवत्पूर्वक्षणावच्छेदेन तत्परामर्शनाशस्यो
त्वा

त्रु.प.
३२
तृतीयप२

पदर्शितसंबंधेन वैशिष्ट्यस्य सत्वेपि द्वितीयपत्नीपक्षतावच्छेदेन तादृशनाशाभाववैशिष्ट्यस्याग्रहात्तेनानुपप
त्त्यभावात् । न चैवं परामर्शादिचतुर्थस्थले सज्ञान्यलिंगकानुमितौ व्यभिचारो दुर्वारः । तादृशानुमितेरुद्धिपरा
मर्शद्वितीयपरुरागोऽत्र स्वक्रमेण तादृशप्रागभावादिवैशिष्ट्यावच्छेदेन परामर्शाधिकरणसमयध्वंसवत्ता
त् । तादृशकर्मणास्वजन्यपरामर्शद्वितीयपत्नीपक्षतावच्छेदेनोपदर्शितसंबंधावच्छिन्नप्रतियोगिताकनाशा
भाववैशिष्ट्यादिति वाच्यं स्वनाशाभाववैशिष्ट्यात्तदवच्छेदेन तादृशप्रागभावादिविशिष्टत्वावच्छेदेन वानद्रुत्प
त्तिकत्वनिवेशेन तादृशपरामर्शनाशोत्तरक्षणावच्छेदेन तथाविधकर्मोत्पन्नानुमितौ व्यभिचाराभावात् ।
वह्निव्याप्यधूमवान्वह्निमांश्च पर्वत इत्याकारकसमूहालंबनात्मकान्यलिंगकानुमितौ धूमपरामर्शपरामर्शाव्य
वहितोत्तरक्षणावृत्तिसाध्यव्यभिचारवारणाय योत्स्योन्यत्रिपर्वतनिवेशनानवस्थाधिकरणसमयप्रागभाव
वत्त्वविशिष्टकालिकविशेषणतासंबंधेन तादृशक्षणावच्छिन्नत्वनिवेशेनैव तादृशानुमितौ व्यभिचारवारणसंभ रा.म. ३२

कविशेषणतयास्वात्मकत्वेपरामर्शव्यवहितोत्तरक्षणवृत्तित्वेपि तादृशक्षणस्य तदधिकरणसमयप्रागभाववत्त्वाभावेन स्वाधि·

वृत्तितादृशानुमितेः कालिककरणसमयप्रागभाववत्त्वविशिष्टकालिकविशेषणतया तादृशवृत्तित्वादिति वाच्यं एवमप्य
पेक्षणात्मकतादृशसमूहालंबनानुमितौ व्यभिचारस्य दुर्वारत्वात् तादृशीयक्षणस्यापि तदधिकरणत्वे पि स्वाधिकरण
समयप्रागभाववत्त्वसंबंधेन तत्संबंधावच्छिन्नीयक्षणोपि हेतोः । स्वप्रतादृशक्षणोत्पत्तिकत्वं स्वाधिकरणस्य यदपध्वंसानधि
करणक्षणप्रसिद्धेरिति तत्तद्व्यक्तिरेव स्वपदार्थो वाच्यस्तथा चाननुगम इति चेन्न । स्वाधिकरणसमयध्वंसवत्त्व
करणतादृशक्षणवृत्तित्वात् तत्संबंधानुमितिसामान्यं तु सर्वं प्रमेयं वस्तुणं तं सर्वं स्ववीयानुमित्यधिकरणतया तादृशध्वंस तिध्वंसाप
नधिकरणसंबंधावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववत्त्वावच्छिन्नकालिकविशेषणतासंबंधेन तद्वन्निष्ठत्वमेव तद्वत्त्व
त्रिकत्वं । हिनापादिरूपेण तादृशसंबंधेन स्वाभावाप्रसक्तावाप्तिप्रसंगः । स्वत्वस्य स्वात्ममात्रं तत्तद्व्यवहितोत्तरक्षणत्वमपि
त्वेन संबंधोपेनरूपत्वादिनिवेशनेनाननुगमः स्वाश्रयितदनुमितिनिष्ठस्याव्यवहितोत्तरत्वमेवं संबंधः तथाव्यव
हितत्वे पूर्ववाल्लब्धवृत्तिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववत्त्वं वाच्यं । अत एवं

अ.प. स्त्ववृत्तिप्रागभावप्रतियोगित्वे सदवृत्तित्वं यत्कालिकसंबंधेन धूमपरामर्शादिस्तद्वृत्त्यन्यत्वात् तत्समसमयोत्पत्तिका-
२४ वोऽनुमितिर्न तद्वृत्तिप्रागभावप्रतियोगिनी उक्तानुमितिप्रागभावस्य तत्परामर्शासमानकालीनत्वनियमात् तद्वृत्ति-
३५ त्वात्. असमानकालीनयोराधाराधेयभावविरहादिति। अथ पर्वतधूमपरामर्शद्वितीयक्षणे धूमज्ञानाप्रामाण्या-
वगाह्यालोकपरामर्शः तदुत्तरं चानुमितिस्तादृशानुमितौ अप्रामाण्यग्रहाभावविशिष्टपरामर्शस्य प्रा-
गसत्त्वेन व्यभिचारः। न चाप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शो व्यवहितोत्तरत्वस्य कार्यतावच्छेदकता-
घटकसंबंधत्वोपगमान्न तत्र व्यभिचार इति वाच्यं। तादृशपरामर्शस्योत्पत्तिक्षणावच्छेदेनाप्रामाण्यग्रहवि-
शिष्टस्य तत्त्वस्य कार्यतावच्छेदकीभूतवैशिष्ट्यभावेन तत्र व्यभिचार इति वाच्यं। तथासति उत्पत्यधूमपरामर्शनिष्ठहेतुत्वेध-
र्मितावच्छेदककाप्रामाण्यग्रहानन्तरोत्पन्नधूमपरामर्शोत्तरजन्यानुमितेरसंग्रह इति चेत्। न। स्वाव्यवहितोत्तर-
क्षणोत्पत्तिकत्वसंबंधेनाव्यवहितोत्तरत्वसंबंधेनैव वाऽप्रामाण्यग्रहाभावविशिष्टपरामर्शाधिकरणक्षणविशि- (ष्टक्षण) त.प. २४
प्रामाण्यग्रहाभावविशिष्टतया तदव्यवहितोत्तरत्वस्य तादृशानुमितावप्यक्षतत्वेन व्यभिचारवारणासंभवात् न चाव्यवहितोत्तरत्वसंबंधेनाऽ

ष्टत्वमेवाबाधाभावग्रहाभाववविशिष्टपरामर्शजन्यतावच्छेदकं। अव्यवहितोत्तरत्वं च द्वितीयक्षणमात्रसाधारणं
।स्वध्वंसोत्पत्त्यधिकरणत्वमनुमितेर्द्वितीयक्षणोत्पन्नानुमितिसाधारणं स्ववृत्तिप्रागभावप्रतियोगित्व
संबंधावच्छिन्नप्रतियोगिताकस्वनाशाभाववत्त्वे सति स्ववृत्तिप्रागभावप्रतियोगित्वमेव वा विनश्यदव
स्थपरामर्शजन्यानुमितौ च परामर्शाधिकरणद्वितीयक्षणवैशिष्ट्यं तादृशसंबंधेनवर्त्तमानतरत्तिनतादृसं
ग्रहः।३। अस्य से बाधाभावग्रहाभाववविशिष्टपरामर्शाधिकरणानुत्पत्तिक्षणप्रद्वितीयक्षणोविशिष्टनि
रूपितविलक्षणाधिकरणत्वविहानेः। न द्व्यव्यवहितोत्तरत्वं च न तृतीयक्षणोत्पन्नानुमितेः तादृशानुमितेस्स्व
वृत्तिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नप्रतियोगिताकक्षणनाशाभाववत्त्वविरहात्तत्रेति न व्यभिचारः।
अस्य विशिष्टनिरूपितविलक्षणाधिकरणतापाविशिष्टनिरूपितविलक्षणाधिकरणतात्वेनैवप्र
सत्तात्रा विशेष्याधिकरणतापाव्याप्तवृत्तिर्न संभवति प्रसुद्दविशेष्यस्य विशिष्टस्यानतिरेकित्वादिति चेन्न। अ

अ.प.
३५
35

प्रामाण्यग्रहाभावरूपविशेषणतावच्छिन्ननिरूपकताकाधिकरणतात्वेनैव न निवेशः । शुद्धविशेष्यताश्रयकार
णतानिरूपकत्वेन च तादृशविशेषणतावच्छिन्नं । अतो नातिप्रसंगः । इत्थं च तादृशत्वेनोक्तरूपेणावच्छिन्नक्रियावृत्ति
जनकतासंबंधेन संयोगविशिष्टकर्मत्वात् स्वप्रतियोगिमत्वसंबंधावच्छिन्नप्रतियोगिताकप्रागभावाभा
वविशिष्टकर्मत्वं वा । अन्यत्वरूपावच्छिन्नपदार्थसामान्यवृत्तितादृशप्रागभावाभावविशिष्टत्वं वा । तत्ताद्रू
पतावच्छिन्नक्रियावृत्तिनिरुक्तरूपतावत्त्वं । तथा सति धूमपरामर्शादिवह्न्यादिहेतोस्तत्रान्यालिंगकानुमि
तौ व्यभिचारस्य दुर्वारत्वात्तादृशानुमितिमात्रविधूमपरामर्शमात्रकार्यतारूपावच्छिन्नकर्मतानिरूपितकारणाधिकर
णतारूपतानिरूपितानिरुक्ताव्यवहितोत्तरत्वसत्त्वात् । शेषमन्यत्र द्रष्टव्यं पूर्वोक्तदिशावसेयमिति । अथवा स्वाव्यवहि
तपूर्वत्वरूपावच्छेदेनाप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शत्वविशिष्टसमवायसंबंधेन कार्यतावच्छे
दकं तेनानुमितित्वमेवाऽपरामर्शानस्य तेन तेनादृशसंबंधेनानुमितितास्य प्रयोजकतया । अव्यवहितपूर्वत्वरूपोऽ अ.प.
३५

कार्यतावच्छेदकसंबं

प्रामाण्यग्रहोत्पत्तिरत्वावच्छेदेनाप्रामाण्यग्रहाभावविशिष्टस्य धूमपरामर्शस्याभावादिति न व्यभिचारः।
स्वाव्यवहितपूर्वत्वं च स्वाधिकरणसमयप्रागभाववत्त्वसंबंधावच्छिन्नप्रतियोगिताकस्वप्रागभावाभाववत्त्वे
सति स्वप्रागभाववत्त्वं। हेतुतालं च पूर्वविनष्टकमेवा। केचित्तु। स्वव्यवहितोत्तरत्वे सति स्वव्यवहितप्रागभावप्रति
योगित्वमेव स्वाव्यवहितोत्तरत्वमिति निष्कृष्टः परामर्शस्य संबंधः। परामर्शोत्पत्तिक्षणोत्पत्तिकाद्वितीय
क्षणोत्पन्नमितिकावच्छिन्नः कालिकसंबंधेन परामर्शवृत्तिः परामर्शद्वितीयक्षणोत्पन्नानुमितौ च कालिकसं
बंधेन तदुभयविषयकत्वनियमत्वात्। तृतीयक्षणोत्पन्नानुमितौ च तेन संबंधेन द्वितीयक्षणोत्पन्नत्वकृतनियमत्वमिति तु
भयसंग्रहः। एवं मयेत्यनुव्याप्यकपरामर्शवत्तृतीयक्षणोत्पन्नानुमितेः तृतीयक्षणोत्पन्नत्वकृतनियमादायसत्त्वः
परामर्शनाशानंतरोत्पन्नान्यलिंगकानुमितौ च न तद्व्याप्तिकृतनियमत्वकृतेः द्वितीयक्षणमात्रस्यापि तत्त्वान्न पराम
र्शवृत्तित्वेन स्वजन्यत्वाशोत्तरमतत्त्वान्यलिंगकपरामर्शजन्यायाव्याप्यधूमादिविषयकानुमितेस्तत्र

अ.प. रणाप्रसहवृत्तिप्रागभावप्रतियोगित्वनिवेशः। न च स्ववृत्तिवृत्तिमत्त्वं स्ववृत्तिज्ञानादिमत्त्वं वा निवेश्य भेदे स्वत्रापि विनिगमनावि
३६ रह इति वाच्यं। अपेक्षाबुद्ध्यात्मकपरामर्शस्य त्रिक्षणस्थायित्वेन परामर्शद्वितीयक्षणोत्पन्नापेक्षाबुद्धिमादायैव चतुर्थक्ष
36 णोत्पन्नानुमितिसाधारण्यप्रसंगेनोत्पन्नानिवेशासम्भवात्। न चैवं सुखादिनिवेशमादाय विनिगमनाविरह इति वाच्यं
। सुखादिनिवेशे तादृशपरामर्शकालीनविद्युत्सुखेनोत्पन्नतादृशपरामर्शजन्यानुमितेरसंग्रहप्रसंगात्। न हि सर्व
दा सुखोत्पादे मानमस्ति। न च ज्ञानत्वनिवेशे प्येष दोषस्तुल्य एव इति वाच्यं। अनेनोत्पन्नयोनिकृतेरेव परामर्शद्वयतो उ
त्पादस्यावश्यंसंभवात्। न चैवं तत्क्षणे पर्वतधूमपरामर्शोत्तरं तद्धूमारोपावगाह्यज्ञानोत्कपरामर्शस्तत्तृतीयेऽनुमिता
वप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शस्य व्यभिचारो दुर्वार इति वाच्यं। अप्रामाण्यग्रहाभावविशिष्टत्वादेरेव स्व
वृत्तित्वस्य हेतौ निवेशनीयतया तादृशस्य तस्य ज्ञानानुमितौ तादृशहेतुमत्ताभावेन व्यभिचारानवकाशात्। न विशेष
णवैशिष्ट्यावच्छिन्ननिरूपितताया दृष्टविशेष्यनिरूपितत्वे हि त्रिविधलक्षणानां हेत्वोरयानाभाव इति नाशंकनीयं। तादृ राम: ३६

तृतीयक्षणो.

कर्मात्मकक्षणएव पूर्वापरकालावच्छेदेन तयोर्वृत्तेः विलक्षणाधेयत्वोपगमेव प्रतियोग्यधि २ णेकारणसत्वात् धूमपरामर्शादिसामानाधिकर ४

शाविलक्षणाधेयत्वानुपगमे ध्वंसप्रागभावयोः प्रतियोग्यधिकरणक्षणवृत्तित्वव्यवहारप्रसंगात् प्रतियोग्यधिकरणी
भूतविभागप्रागभावादिविशिष्टकरणीभूतकर्मक्षणावच्छेदेन ध्वंसप्रागभावयोरहेत्रेनोक्तिप्रसंग इति दिक्
स्त्रयाव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटिप्रवेशेपि गुरुणां मते धूमपरामर्शाव्यवहितोत्तरजायमानानु
लिंगकानुमितेर्व्यभिचारो दुर्वार एव कार्याव्यवहितपूर्वरूपणावच्छेदेन कार्याधिकरणस्य तज्जन्यतावच्छेदककोटौ
निवेशेपि न निस्तारः। निरुक्तानुमितेर्नाम व कालांतरीयधूमपरामर्शसमानाधिकरणत्वात्। स्वसमाना
धिकरणधूमादिपरामर्शाव्यवहितोत्तरत्वनिवेशेपि स्वपदस्य तत्तदनुमितिपरत्वे ऽनुगम इति चेन्न सामा
नाधिकरण्याव्यवहितोत्तरत्वोभयसंबंधेन धूमादिपरामर्शवत्वस्यैव धूमादिपरामर्शजन्यतावच्छेदकत्वोपग
मे गुरुणां तदीयधूमपरामर्शाव्यवहितोत्तरस्य तद्वाप्यान्तसुरूपाणामपि धूमपरामर्शसामानाधिकरण्येपि उभय
संबंधेन च किंचिद्धूमपरामर्शादिमत्वमिति न व्यभिचार इति संक्षेपः। अन्ये तु अवमलिंगकानुमितित्याहोत्तरं जाति

कालांतरीण२

श्रु.प. विशेषणत्ववद्धूमपरामर्शजन्यतावच्छेदकतया साक्षिकयोरुभयलिंगकानुमित्योर्वान्यदेव वैजात्यं तु उभयलिंगकप
१७ रामर्शजन्यतावच्छेदकमनुपपन्नोन तत्रैक्यपरामर्शजन्यतावच्छेदकानां नानाजातेपश्चिन धूमपरामर्शजन्यताव
37 च्छेदकालोकपरामर्शजन्यतावच्छेदकजात्योः संकरः। न चोभयपरामर्शजन्यतावच्छेदकवैजात्यावच्छिन्नोन्यत्रि
कालेच्छन्यैकपरामर्शजन्यतावच्छेदकावच्छिन्नाप्रसिद्धेस्तदवच्छिन्नोत्पादकसामग्र्या व्यापकत्वादिति वाच्यं। तस्या
व्यलिंगकानुमितिं प्रति तदन्यलिंगकपरामर्शस्य प्रतिबंधकतोपगमादिति स्यात्तु। न च समतो वैजात्यकल्पनायां गौ अनंत
रवादिति वाच्यं। अन्यलिंगकानुमितिव्यावृत्तो विधेयताविशेषणत्ववद्धूमादिलिंगकपरामर्शजन्यतावच्छेदक
उपेयते उभयादिलिंगकानुमितौ तदुभयपदविधेयतायेयते न तु संकरस्यादोषत्वादिति॥ तत्र धूमालोकादि
लिंगकानुमितित्वपरस्परव्यावृत्तानां विलक्षणविधेयतानामनुपलम्भबाधेन कल्पयितुमशक्यत्वात्। कार्यता राम.
वच्छेदकतया विलक्षणविधेयतास्वीकारे प्रसिद्धानां तत्कारणतावच्छेदकतयापि विलक्षणपरामर्शोपि विलक्षणा १७

विषयतासिद्धिप्रसंगाद्यात्। तस्माद्व्यवहितोत्तरत्वनिवेश एव साधीयान्। अव्यवहितोत्तरत्वनिवेशे वा तु मितिविष
यीभूतपक्षसाध्यादिविषयतानकार्यतावच्छेदककोटौ निवेशप्रयोजनविरहात्। न च विषयविशेषविषय
तायाः निवेशे वह्निव्याप्यधूमवान्पर्वत इत्येतादृशपरामर्शकाले पर्वतो वह्न्यभाववानित्येतादृशबाधकालेऽप्यनु
मित्यापत्तिः। तादृशपरामर्शविशिष्टत्वस्य तथाविधबाधाभावजन्यतावच्छेदकेन समं व्याप्यव्यापकभावविरहे
ण तादृशपरामर्शजन्यफलजनने तादृशबाधाभावस्य सामान्यसामग्रीत्वाभावेन विशेषसामग्रीत्वाभावेन च सहका
रित्वासम्भवात् इति वाच्यं। सामान्यविशेषभावविरहेऽपि सहकारितायाः प्रागेव व्यवस्थापितत्वात्। न च विषयवि
शेषविषयतायाः परामर्शजन्यतावच्छेदके निवेशे वह्निव्याप्यवत्तापरामर्शाद्वह्न्यनुमितिरेवोत्पद्यते न तु पर्वता
नुमितिरित्यत्र नियामकाभाव इति वाच्यं। वह्निव्याप्यवत्तानिर्णयजन्यतावच्छेदके वह्न्यादिविषयतायाः निवेशेऽपि तद्
घटितसामग्र्या वह्निविधेयताकानुमितित्वावच्छिन्नं प्रत्येव व्याप्यत्वोपगमाने तादृशसामग्रीतो वह्नित्वाद्यवच्छिन्ने

अ.प. विषयताशालित्वन्तु मितिरेवास्त्वयते । एवं तद्धर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नयद्विषयिताया एव
१८ सामग्र्यास्तद्धर्मावच्छिन्नोत्पादनियामकत्वात् तवं च व्याप्यवत्तापरामर्शजन्यतावच्छेदकैव स्यादिविषय
३४ त्वानिवेशे कथं तद्धर्मावच्छिन्नोत्पादकत्वमिति वाच्यं परामर्शजन्यतावच्छेदककोटौ वह्न्यादिविषयतानिवेशपि ता
दृशसामग्र्या घटकसिद्ध्यभावजन्यतावच्छेदके तन्निवेशेन तादृशसामग्र्या वह्न्यादिविषयकत्वावच्छिन्नोत्पाद
नियामकत्वसंभवात् । स्वप्रसिद्ध्यभावजन्यतावच्छेदके [redacted] कोटौ सिध्यनुत्तरत्वनिवेशस्यावश्य
स्यापनीयतया व्यभिचाराभावेन तत्रापि विषयविशेषनिवेशे परामर्शजन्यतावच्छेदके तन्निवेशनमुचि
तं न तु सिद्ध्यभावजन्यतावच्छेदके । परामर्शजन्यतावच्छेदककोटौ तु यानानाविधविशेषविरहकूटघटितस्य सि
द्ध्यभावजन्यतावच्छेदकधर्मस्यागुरुत्वात् । न च लिंगभेदेन परामर्शहेतुतावाहुल्यादनंतकार्यकारणभाव
विषयनिवेशापेक्षया सिद्ध्यभावजन्यतावच्छेदके तन्निवेशनमुचितमिति वाच्यं तत्र तल्लिंगके छानाद्यपेक्षत्वेन जनक रा.म. १८
निवेशस्यानावश्यकता एतदनुरोधमात्रेणेति ४

त्वानुरोधेन सिद्ध्यभावस्यापि लिंगभेदेन हेतुतावच्छेदकत्वस्यावश्यकत्वादिति चेन्न । एवं सति वह्न्यादिविषयकानुमि-
तित्वावच्छिन्नं प्रति सामान्यतो ज्ञानत्वेनात्मत्वेनात्मत्वेन वाऽतिरिक्तमेकं कारणत्वे कल्प्यते ।। लिंगभेदेनानंतपरा-
मर्शनिष्ठजनकतानिरूपितजन्यतावच्छेदकविषयतानिवेशापेक्षया एतत्कल्पने लाघवात् ।। एवं च यादृशकार-
णतावच्छेदकावच्छिन्नस्याप्युपदर्शिते सामग्रीघटकतया तादृशसामग्र्या च वह्न्यादिविषयकानुमितित्वावच्छि-
न्नं प्रति जनकत्वसंभवादिति । अथ व्याप्यवह्निमतोऽरत्वे निवेशितेप्यनुमितित्वनिवेशनमावश्यकमेवान्यथा
परामर्शव्याप्यवह्निमत्तरक्षणोत्पन्नसंयोगविशिष्टादेरपि स्वव्याप्यवह्निमत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभ-
यसंबंधेन परामर्शविशिष्टत्वरूपपरामर्शजन्यतावच्छेदकाक्रांततया पक्षादेरपि तदुत्पत्त्यधिकरणतयाऽनु-
त्पन्नपरामर्शाभावेन व्यभिचारप्रसंगात् । परं च कार्यतावच्छेदकविशिष्टाधिकरणे कारणाभाव एव व्यभिचा-
रः । न तु कार्यतावच्छेदकोपलक्षिताधिकरणे तदसत्त्वं व्यभिचारः एवं च विशेषणीभूतपरामर्शानधिकरणाघ

अ·प· ३९

टादौ कार्यतावच्छेदकीभूतपरामर्शविशिष्टाधिकरणतायाश्च सत्वान्न व्यभिचार इति विभाव्यते। न त्वनुमितित्वेन नि
वेश्यमिति। परन्तु· वह्निव्याप्यधूमवत्त्वज्ञानेऽपि तादृव्याप्यवत्त्वज्ञाने इदं ज्ञानं धूमाभाववति धूमप्रकारकमित्यप्रामा
ण्यज्ञानं चेत्तदनन्तरं तेनैव घटानुमितिस्तत्र वस्त्वनुमितिवारणाय प्रामाण्यज्ञानाभावो वह्न्यनुमितिजनक
तावच्छेदककोटौ निवेशनीयः। एवं च तादृशप्रामाण्यग्रहव्यक्त्यभावघटितकारणतावच्छेदकावच्छिन्नस्य ता
दृशघटानुमितौ व्यभिचारवारणाय कार्यतावच्छेदके विषयविशेषोऽवश्यं निवेशनीयः। अन्यथा कार्यताव
च्छेदककोटिनिविष्टपरामर्शे तत्तद्प्रामाण्यग्रहव्यक्त्यभावस्य निवेशनीयतया गौरवप्रसंगात्। एवमप्रामा
ण्यज्ञानास्कन्दितवह्निव्याप्यवत्त्वज्ञानकाले वह्न्यादिविषयकत्वादौ व्यभिचारवारणायानुमितित्वनिवेशन
मावश्यकम्। अन्यथा कार्यतावच्छेदकप्रविष्टपरामर्शे तत्तद्प्रामाण्यग्रहाभावस्य निवेशनीयतया गौर
वादिति· तदसत्· अप्रामाण्यज्ञानानामनुगतरूपेणाभावनिवेशस्य व्यवस्थापितत्वात्· विषयाद्यनिवेशे राम· ३९

षिकार्यतावच्छेदकत्वविरहपरामर्शोपदर्शितात्प्रामाण्यग्रहाभावनिवेशाधिक्यविरहादिति संक्षेपः। वह्निव्या
प्यधूमवान् पर्वत इत्याकारकस्यैतद्विशेष्यकपरामर्शस्यैव वह्निव्याप्यो धूमः पर्वत इत्याकारकव्याप्यविशेष्य
कपरामर्शस्याप्यनुमितिजनकतया तादृशपरामर्शस्यापि तद्विशिष्टानुमितिनिमित्तत्वावच्छिन्नं प्रति हेतुप्रकार
तात्वे कल्पनीये वैशिष्ट्यनिवेशाद्वैपरीत्यविशेष्यकपरामर्शजन्यानुमितौ न व्यभिचारः। केचित्तु पर्वतो वह्निव्या
प्यधूमवैशिष्ट्यावगाहिनिश्चयत्वरूपानुगतरूपेणैव हेतुताकल्पने पर्वतो वह्निव्याप्यधूमवैशिष्ट्यावगाहि
त्वं च पर्वतविषयतानिरूपितवह्निव्याप्यधूमविषयताशालित्वं तच्च व्याप्यविशेष्यकपरत्वविशेष्यकोभयप
रामर्शसाधारणमेव। अत एवोभयपरामर्शस्यैकरूपेण हेतुत्वेऽनुलेधूमाभाववति धूमप्रकारकं पर्वता भाववद्वति
पर्वतप्रकारकमिदं रजताकारकयोर्द्वयोरप्रामाण्यज्ञानकोरभावस्यैकत्वनिवेशाने धूमप्रकारकत्वघटि
ताप्रामाण्यग्रहहरणो धूमविशेष्यकपरामर्शात्तत्परामर्शोपपर्वतप्रकारकत्वघटिताप्रामाण्यग्रहहरणा

अ॰प॰ ४० यां पर्वतविशेष्यकपरामर्शादनुमित्यनुदयप्रसंगः। नचाप्रामाण्यग्रहाभावस्य परामर्शनिष्ठकारणतायामव
च्छेदकत्वे एवंरूपमनुपपत्तिः वयन्तु अप्रामाण्यग्रहाभावस्य प्रत्येकं कारणतामेव स्वीकरिष्याम इति वाच्यं। अप्रा
माण्यग्रहाभावस्य हेतुतामते नैकविधपरामर्शयोः पृथक्कारणताकल्पनस्यावश्यकत्वात् अन्यथा
एकविधाप्रामाण्यग्रहविशिष्टान्यविधपरामर्शकाले उभयविधाप्रामाण्यग्रहाभावधूमादिपरामर्शघ
टितसामग्र्याः सत्त्वादनुमित्युत्पत्तेः धूमपरामर्शेन फलजनने उभयविधाप्रामाण्यग्रहाभावयो
रस्य सहकारित्वोपगमे तु अनुमितौ स्यादप्रयोजिकायाऽन्यविधाप्रामाण्यग्रहाभावव्याप्यविषयतानिरू
पितप्रकृतविषयताशालिनिरूपत्वावच्छिन्नघटितसामग्र्याः पर्वतपरामर्शप्राप्रामाण्यग्रहकालेपि सत्त्वे
नानुमित्युदयापत्तेरिति चेन्न। स्वीयधूमाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यताव
च्छेदकीभूतधूमप्रकारतासंबंधेन धूमप्रकारकत्वघटिताप्रामाण्यग्रहस्याभावः परामर्शनिष्ठानु ए॰म॰ ४०

स्थितिजनकीभूतव्याप्यविषयतायां स्वीयपर्याप्तताभाववद्विशेष्यतानिरूपितस्वप्रकारतानिरूपितवि
शेष्यतावच्छेदकीभूतपर्याप्तप्रकारतात्वसंबंधेन पर्याप्तप्रकारकत्वघटितप्रामाण्यग्रहस्याभावस्य व्या
विधेयस्य विषयतायां निवेशः। एवं च भ्रमप्रकारकत्वघटितप्रामाण्यग्रहदशायां न व्याप्यविशेष्यकपरा
मर्शो हेतुभिन्नत्वे तु रयापत्तिः। तादृशपरामर्शीयव्याप्यविषयतायां प्रकारतात्वाभावेनोपदर्शितसंबंधा
वच्छिन्नप्रतियोगिताकतादृशप्रामाण्यग्रहाभावस्याहेतुत्वात्। तथा पर्याप्तप्रकारकत्वघटितप्रामाण्य
ग्रहदशायां पक्षविशेष्यकपरामर्शो हेतुभिन्नत्वे तु रप्रसंगः। तादृशपरामर्शीयपक्षविषयतायां प्रकारता
त्वाभावेन उपदर्शितसंबंधावच्छिन्नप्रतियोगिताकतादृशप्रामाण्यग्रहाभावस्याहेतुत्वात्तानवेऽपि रूप्योन
रस्य व्याप्यप्रकारकत्वादिघटितप्रामाण्यग्रहदशायां परामर्शोत्पत्तिविशेष्यकतादृशप्रामाण्यग्रहद
शायां च व्याप्यादिप्रकारकपरामर्शो हेतुभिन्नत्वे तु दप्रसंगः। प्रकृतपरामर्शोत्पत्तिघटितविधाप्रामाण्यग्रहद

स्व.प्र. स्वउपदर्शितसंबंधेन सत्तादिति वाच्यं॰ स्वसमानाधिकरणस्वनिरूपितविशेष्यताशालिज्ञाननिरूपित
४१ त्वविशिष्टप्रकारताशालिप्रकारतात्वसंबंधेनैवाप्रामाण्यग्रहस्याभावनिवेशात्॰ स्वव्यधिकरणस्वाभिन्नविशेष्य
ताप्रामाण्यग्रहस्य चेत्त्वीयप्रकारतायोगितादृशसंबंधेनाभावस्याहृतत्वादिति। न च तादृशाप्रामाण्यग्रहस
मानाधिकरणतद्विशेष्यीभूतपरामर्शविषयतानां प्रकृतविषयतानामभिन्नतयास्वसमानाधिकरण
स्वविशेष्यीभूतज्ञाननिरूपितत्वावच्छिन्नव्याप्यादिप्रकारतात्वसंबंधेन प्रकृतपरामर्शीयव्याप्याद्यप्रका
रताकामपि तादृशाप्रामाण्यग्रहसत्त्वात्कथमेतदिति वाच्यं॰ ज्ञानव्यक्तिभेदेन विषयताभेदावगमात्
मतैवमेते व्याप्यपक्षोभयनिश्चयत्वनिवेशानुरोधेन ह्रदपक्षकारणतामनुरूपेन क्रोच्यं॰ अन्यथा द्विविधनिश्चयत्वस्य
कत्वनिवेशे व्याप्यसंशयसत्वे व्याप्यविशेष्यकपरामर्शात्मकस्वरूपप्रकारकसंशयात्मकानुमयहविशेष्यकपराम
र्शोत्पादानुमितरनुदयप्रसंगादिति वाच्यं॰ स्वावच्छिन्नविषयतावत्त्वावच्छिन्नप्रतियोगिताकाभावगणपरिचयमाभावत्व रमं ४१

तेषु तत्प्रकारकाभिमप्रामाण्यग्रहे व्याप्यपर्वतीयधूमवान्पर्वत इत्याकारकानुपरुविशेषणताकपरामर्शादनु
मितस्तु तन्मितिः प्रामाण्यग्राहिका । न च व्याप्यादिविषयत्वांशे विशेषणताभिन्नप्रकारादिविषयतानिरूपकत्वं तादृ
शव्याप्यादिप्रकारतात्वावच्छिन्नत्वसंबंधेन व्याप्यादिप्रकारकत्वघटितप्रामाण्यग्रहाभावो निवेशनीय
ः । तादृशपरामर्शीयपक्षप्रकारतात्वावच्छिन्नत्वसंबंधेन व्याप्यादिप्रकारकत्वविरहात् । तत्प्रकारतात्वेन पक्षे वि
षयतानिरूपकत्वाप्रसिद्धेः विशेष्यतात्वेनैवेति तन्निष्ठपक्षविषयतानिरूपकत्वं तादृशव्याप्यप्रकारता
तावच्छिन्नत्वसंबंधेन तादृशप्रामाण्यग्रहस्याभावः सुलभ एव । वस्तुतस्तु तत्पक्षमुख्यविशेष्यकव्याप्यवत्त्व
विशेष्यकपरामर्शीयो वैशिष्ट्यानुमितिजनकत्वेन तत्त्वस्य प्रामाण्याभावादिति तत्त्वम् ॥ अथ व्याप्यविषयतानि
रूपितपक्षविषयताशालिनिश्चयत्वेनानुमितिहेतुत्वे वह्निव्याप्यपर्वतः वह्निव्याप्यः पर्वत इत्याकारकव्या
प्यनिरूपितानाधेयत्वपक्षनिरूपिताधिकरणतावगाहिपरामर्शादनुमित्यापत्तिः तेषां व्याप्यविषयतानि

अ॰प॰ रूपितपक्षविषयताशालित्वादिति चेन्नैवं। व्याप्यप्रकारकेणः किंचित्संबंधावगाहिज्ञानाद्यनुमितिवारणाय हेतु
४२ तावच्छेदकं संबंधविषयतानिवेशनमावश्यकं। एवं च व्याप्यविषयतानिरूपितायाः संयोगनिष्ठसंसर्गि
12 कविषयतानतिरिक्तपक्षविषयताशालिनिश्चयत्वेनैव हेतुत्वं वाच्यं। व्याप्तिपर्वतः व्याप्यः पर्वतवानिति ज्ञा
कारको परामर्शो यो धूमसंयोगावच्छिन्नाधेयत्वसंयोगावच्छिन्नाधिकरणत्वयोः संसर्गतया व्याप्य
विषयतानिरूपितनाधेयत्वाधिकरणत्वीयसंसर्गिकविषयतानिरूपितपक्षविषयताशालित्वमतो
नातिप्रसंगः। अत्रैवं पर्वतेवह्निव्याप्यइत्याकारकेतादृशस्यापि संयोगावच्छिन्नाधेयत्वादिसंसर्गकत्वेन व्या
प्यविषयतानिरूपितसंयोगसंसर्गकविषयतानिरूपितपक्षविषयताशालित्वमितिचेत्काहानिः।न हि
संयोगावच्छिन्नाधेयतासंसर्गकपक्षविशेषणकपरामर्शसंयोगसंबंधावच्छिन्नाधिकरणतासंसर्गकपरा
मर्शयोरनुगमोविधेयतेनकिं तु संयोगसंसर्गकव्याप्यपक्षोभयविषयताशालिपरामर्शयोः एतयोः स्त्रोपद राम॰ ४२

ष्टिं न कारणतावच्छेदकाकांतत्वमस्य वा नैवमपि संयोगावच्छिन्नाधेयतासंबंधेन पक्षविशेषणकपरामर्शस्य सांनेध्य
णहेतुत्वमावश्यकमिति वाच्यं। तादृशपरामर्शस्यानुमितिहेतुतायाश्चानभ्युपगमात्। न च संयोगसंबंधेन पक्षविशेष
णकपरामर्शस्य तादृशपरामर्शस्य वाऽनुमितिहेतुत्वमित्यत्र विनिगमनाविरह इति वाच्यम्। संयोगावच्छिन्नाधे
यतानिरूपकसंसर्गकविषयतानिवेश्यतादृशपरामर्शस्य हेतुतामपेक्ष्य संयोगादिसंसर्गकविषयतानिवेश्यपक्ष
विशेषणकपरामर्शहेतुत्वे लाघवस्यैव विनिगमकत्वात्। न च संयोगसंसर्गकव्याप्यविशेष्यकपरामर्शत्वापेक्ष
या संयोगादिसंसर्गावच्छिन्नाधेयतासंसर्गकपरामर्शत्वस्य गुरुत्वेऽपि संयोगावच्छिन्नाधिकरणतासंसर्गकव्याप्य
विशेषणकपरामर्शत्वापेक्षयाऽनपायात् संयोगावच्छिन्नाधिकरणतासंसर्गकव्याप्यविशेषणकसंसर्गकपराम
र्शस्य संयोगावच्छिन्नाधेयतासंसर्गकपक्षविशेषणकपरामर्शस्य वा हेतुत्वे कल्प्यमानेऽस्मत्रे विनिगमकदानस्याश
क्यतया तादृशपक्षविशेषणकपरामर्शस्य हेतुतासाद्वानिष्टसत्त्वेऽपीति वाच्यं। पक्षतायां च हेतुतावच्छेदकः संबंधः संयो

अ॰प॰ ४२ 43 णस्तत्रपदिसंयोगावच्छिन्नाधिकरणतासंसर्गकव्याप्यविशेषणकत्वेनेदं तु सत्त्वे हेतौ न त्वं भवति। तदेव न। तस्य पक्षीं
शेव्याप्यीयहेतुतावच्छेदकसंबंधानवगाहित्वात्। परंतु पक्षे संयोगावच्छिन्नाधिकरणतात्वे व हेतुतावच्छेदकः संबंधस्तत्रै
वतादृशपरामर्शस्य हेतुत्वात्। अत्र च संयोगावच्छिन्नाधेयतासंबंधेन पक्षे विशेषणताकज्ञानस्य हेतुत्वेन संभवति। संयोगा
वच्छिन्नाधिकरणतारूपव्याप्यतावच्छेदकसंबंधानवगाहित्वात्। तादृशव्याप्यविषयतानिरूपितसंयोगसंबंधनि
ष्ठसांसर्गिकविषयतानिरूपितपक्षविषयताशालिनिश्चयत्वेनानुमितिहेतुत्वे पक्षे संयोगावच्छिन्नाधिकरणता
त्वे हेतुतावच्छेदकः संबंधस्तत्र तादृशसंबंधेन व्याप्यांशे पक्षविशेषणकज्ञानादप्यनुमित्यापत्तिः। एवं पक्षे समवा
यादिसंबंधेन हेतुतावच्छेदकसमवायादिनाव्याप्यांशे पक्षविशेषणकज्ञानादनुमित्यापत्तिः। न चेष्टापत्तिः। तथा स
ति साध्यशून्ये हेतुरिति भ्रमेऽपि साध्यानुमानापत्तिः। तादृशधर्मप्रकारतानिरूपिताधिकरणत्वसमवायादिसं रामः
सर्गकव्याप्यविशेष्यकज्ञानस्य प्रमात्वेन विशेषदर्शिनामपि तत्संभवतीति चेन्नाद्याधिकरणतासमवायसंबंधाव ४२

च्छिन्नहेतुतास्थले पक्षविशेषणकस्य ज्ञानस्यानुमितिहेतुत्वे पातञ्जानुगमस्य विफलत्वात्। व्याप्यप्रकारतानिरूपित
पक्षविशेष्यताशालिनिश्चयत्वेनैव हेतुत्वोपगमे नातिप्रसंगविरहात्। उक्तानुगमरूपेण हेतुपक्षसंयोगः तादात्म्य
वा हेतुतावच्छेदकः संबंधस्तत्रैवेति ध्येयं। अत्र यत्र संयोगो हेतुतावच्छेदकः संबंधस्तत्रापि पक्षविशेषणताकपरा
मर्शस्य हेतुत्वमनुभवविरुद्धं। न चास्ति साध्यवत्त्वे वृत्तमनिष्पात्रकसंयोगसंबंधेन हेतुत्वेऽपि पक्षधर्मसाध्यानु
मानापत्तेरिति वाच्यं। यत्र संयोगो हेतुतावच्छेदकः संबंधस्तत्र पक्षे हेतुसंयोगित्वेन साध्यव्याप्यतानदाव्यभिचारे
ण व्याप्तिरथो किमनुमितेसंयोगित्वकपक्षसाध्यानुमानं पक्षमनुमानान्ये तृतीयाव्यभूनो नोदास्तादिहृस्त्वनियाम
कसंबंधे न तस्याहेतोर्व्यभिचारि साध्याभावसंबंधित्वपात्रस्य व्यभिचारिशरीरनिवेशनीयत्वात्। अत्र यत्र साध्याव्या
प्तिस्तत्र व्याप्तिरनुमः संभवत्येवेति चेन्न। यत्र भ्रमस्तत्रानुमितिरपि भ्रमात्मिकैव। न एवासल्लिङ्गकपरामर्शादनुमानु
मितावनुभवविरोधोऽपि नेति। पक्षपक्षविशेषणताकपरामर्शात्पक्षविशेष्यताकैवानुमितिरुत्पद्येत नन्वकतां चेति
हेतोः सत्त्वेऽपि तत्र संयोगेन तस्याहेतोर्व्यभिचारः। साध्याभाववद्वृत्तित्वस्यैव व्यभिचारपदार्थत्वात्। दिक्॥ व्य० ८

अ॰प॰ शेषणतया तत्स्वफलीभूतज्ञानेष्वनुपसर्जनतयैव भासनात्। कार्यवैचित्र्यात् व्याप्यपक्षविशेष्यकपरामर्शयोर्वि
४५ शिष्यहेतुताकल्पनमावश्यकमिति नैवं। तादृशनियमे मानाभावात्। उभयथापि पक्षविशेष्यकानुमि
तेरेवोपगमात्। भावसाध्यकस्थले साध्योपस्थितेरपि मतः सत्वे न प्रतिवंधकसत्वात् साध्यविशेष्यकानु
मितेरुत्पादासंभवात्॥ ननु भावसाध्यकस्थले साध्यविशेष्यकानुमितेरसिद्धौ प्रतिवध्यतावच्छेदकाप्रसिद्ध्या
प्रतिवध्यप्रतिवंधकभावकल्पनमेव न संभवतीति वाच्यं। विधेयनिष्ठप्रकारतासामान्यविधेयतावच्छेदकनिष्ठप्रकारता
सम्भावाभ्युपगमानुमितित्वज्ञानत्वाभ्यामेव प्रतिवध्यप्रतिवंधकल्पनात्। एवं विलक्षणानुमितिस्वीकारे परामर्श
हेतुता हेतुः अनुमित्यादिसामग्रीप्रतिवंधकतावृद्धस्याविलेतावतानुमितिस्वीकारे कोविनश्यमपि वाध्यम
श्रवेदं विभावनीयं। व्याप्यविशेष्यकपक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुताकल्पने पक्षविशेष्य
कपरामर्शसत्वकाले सिद्धिसत्वे व्याप्यविशेष्यकपरामर्शनानुमित्युपायाकारकेच्छाकालेऽनुमित्यापत्तिः रा॰म॰ ४५

न्याय 45

अ·प·म व्याप्यविशेष्यकपरामर्शकालेऽनुमित्सुत्वादिकापाकाले तादृशपरामर्शजन्यलप्रकारकानुमित्याविरहवि(
४५ शिष्टसिद्ध्यभावकूटघटितसामग्र्याः नव्याप्यत्वेनत्वात्। एवं व्याप्यविशेष्यपरामर्शकालेसिद्धुसत्वेपक्ष
विशेष्यकपरामर्शजानुमितेनुत्पत्तिस्याकारके व्याप्तत्वादनुमित्यापत्तिरिति विशिष्टैवतादृशपरामर्शयोः
हेतुत्वेपुनः मितिसमाप्तः ॥ ॥ इति श्रीहरिरामतर्कवागीशभट्टाचार्यविरचितोऽनुमितिविचारः समाप्तः

राम· ४५

१०००